കേരളത്തിലെ വിവിധയൂണിവേഴ്സിറ്റികൾ, വിദ്യാഭ്യാസവകുപ്പ്, എസ്.സി.ഇ.ആർ.ടി. എന്നിവ തമ്മിലുള്ള ഏകോപനത്തിലൂടെ അധ്യാപകവിദ്യാഭ്യാസവുമായി ബന്ധപ്പെട്ട് നടത്തുന്ന പഠനവും ഗവേഷണവും നിലവിലെ പാഠ്യപദ്ധതിയും പഠനപ്രക്രിയയുമായി ബന്ധപ്പെടുത്തി പോകാൻ സാധിക്കുന്നതാണ്.

**സേവനകാല അധ്യാപകവിദ്യാഭ്യാസം**

എസ്.സി.ഇ.ആർ.ടി, ഡയറ്റ്, സമഗ്രശിക്ഷാ അഭിയാൻ കേരള എന്നിവയുടെ ചുമതലയിൽ പുതുതായി ജോലിയിൽ പ്രവേശിക്കുന്ന അധ്യാപകർക്ക് നിശ്ചിത ദിവസത്തെ ഇൻഡക്ഷൻ ട്രെയിനിംഗ് നിർബന്ധമാക്കണം.

**കലാ-ശാസ്ത്രപ്രവൃത്തി പരിചയമേളകൾ**

വിദ്യാഭ്യാസത്തിലൂടെ അറിവ്, തൊഴിൽ, മനോഭാവം, തൊഴിൽനൈപുണികൾ ഇവയുടെ വികാസവും വിദ്യാർഥികളുടെ സമഗ്രമായ വ്യക്തിത്വവികാസവും ഉറപ്പാക്കാൻ പഠനപ്രവർത്തനങ്ങൾക്കു കഴിയണം. അതിനായി കരിയർ ഗൈഡൻസും വൊക്കേഷണൽ ഗൈഡൻസും പാഠ്യപദ്ധതിയിൽ ഉൾപ്പെടുത്തണം.

**രക്ഷാകർതൃവിദ്യാഭ്യാസം**

വിദ്യാഭ്യാസലക്ഷ്യങ്ങൾ, കുട്ടിയുടെ സമഗ്രമായ വളർച്ചയും വികാസവും, പഠനബോധനരീതികളിൽ വന്ന മാറ്റം, സമഗ്രവും നിരന്തരവുമായ മൂല്യനിർണയം തുടങ്ങിയവ രക്ഷാകർതൃവിദ്യാഭ്യാസത്തിന്റെ ഉള്ളടക്കമായിരിക്കണം. കുട്ടികളുടെ പഠനം പൂർണ്ണതയിലെത്താൻ വിദ്യാലയത്തെ ഒരു രക്ഷാകർതൃശാക്തീകരണകേന്ദ്രമാക്കി മാറ്റാൻ നമുക്ക് കഴിയണം.

# वार्षिकासूत्रणम्

| एककम् | पाठः | मासः | कालांशः |
|---|---|---|---|
| पल्लवम् | विश्वसौन्दर्यम् | जूण् | 10 |
| | जीवातुरेव द्रुमः | जूण्-जूलाय् | 15 |
| पलाशम् | सुखजीवनम् | जूलाय्-ओगस्ट् | 10 |
| | क्षुधा ज्ञानप्रदायिनी | आगस्ट् | 15 |
| | हितमेवाश्नुयात् सदा | सेप्टम्पर् | 10 |
| कुड्मलम् | मयूरशिखा | सेप्टम्पर्-ओक्टोबर् | 10 |
| | नियम्यतां स्वयम् | ओक्टोबर्- नवम्पर् | 15 |
| | गच्छामो वयम् | नवम्पर्-डिसम्पर् | 10 |
| प्रसूनम् | कारुण्यम् | जनुवरि | 15 |
| | मुक्तकसौभगम् | फेब्रुवरि | 10 |
| | मूल्यनिर्णयम् | मार्च् | |

# पाठासूत्रणमातृका

पाठस्य नाम :

दिनाङ्कः :

अपेक्षितः समयः :

आशयः :

उपाशयः :

व्यवहाररूपः :

उद्देश्यानि/लक्ष्याणि :

मूल्यम्/ मनोभावः :

पठनलक्ष्याणि :

पठनक्षमता :

अध्ययनसामग्री :

अपेक्षिताः उत्पापन्नाः :

कालांशः :

| प्रवर्तनपुटम् | प्रतिकरणपुटम् |
|---|---|
| | |

प्रधानाध्यापकस्य हस्ताक्षरम्

शिक्षकस्य हस्ताक्षरम्

## प्रतिफलनात्मकचिन्ता

मम निरीक्षणानि, मम प्रत्यभिज्ञाः

1

2

3

अनुवर्तमानानि प्रवर्तनानि, परिहारप्रवर्तनानि च।

1

2

3

# एककम् १
# पल्लवम्

## आमुखम्

उच्चविद्यालयस्तरस्य पूर्वस्मिन् वर्गे संस्कृतपठनस्य यद्बीजावापं कृतं तदस्य वर्गस्य अस्मिन्नेकके पल्लवितं भवति। पल्लवाख्ये प्रथमे एतस्मिन्नेकके द्वौ पाठौ स्तः। प्रथमं प्रकृतेः सौन्दर्यस्य वर्णनं कृत्वा विरचितं विश्वसौन्दर्यं नाम गीतम्, द्वितीयं सस्यानामपि जीवनमस्ति, अतः तेषां परिपालनम् अस्माभिः कर्त्तव्यम् इति उद्बोधयितुं काचित् लघुकथा च।

# पाठः १ विश्वसौन्दर्यम्।

| | | |
|---|---|---|
| **आशयः** | : | प्रकृतिः। |
| **उपाशयः** | : | प्रकृतिसौन्दर्यम्। |
| **व्यवहाररूपम्** | : | बालकविता। |
| **उद्देश्यानि/लक्ष्याणि** | : | प्रकृतेः महत्वं जानाति। |
| **मूल्यम्/मनोभावः** | : | प्रकृतिः सर्वथा परिपालनीया।<br>प्रकृतिसौन्दर्यं संरक्षणीयम्। |
| **पठनलक्ष्याणि** | : | बालकवितांताललयानुसारम् आलपति।<br>नूतनपदानि चित्वा अर्थं लिखति।<br>समस्तपदानां विग्रहवाक्यं लिखति।<br>उपसर्गान् विविच्य लिखति।<br>प्रयोगविशेषं ज्ञात्वा उदाहरणवाक्यानि लिखति।<br>कवितायाः आशयं लघूपन्यासरूपेण परिवर्त्य लिखति।<br>समानाशययुक्तानां बालकवितानां सम्पुटं रचयति। |
| **पठनक्षमता** | : | प्रकृतिसौन्दर्यम् आस्वदते।<br>आशयं स्वांशाकृत्य कविताम् आलपति।<br>पर्यावरणस्य संरक्षणमधिकृत्य चर्चां कृत्वा लघुटिप्पणीं रचयति।<br>प्रकृतिविभवानां मितोपयोगं जनान् बोधयितुं विज्ञप्तिपत्रं रचयति। |
| **कालांशः** | : | अष्ट। |

**पाठस्य आमुखम्** विश्वमिदं सर्वचराचरणां वासस्थानं भवति। वृक्षलतादयः पक्षिमृगादयः कृमिकीटादयश्च अत्र निवसन्ति। तदा कूपनदीतटाकादयः जलाशयाः पर्वताः मरुप्रदेशाः केदाराः महारण्यानि च अत्र दृश्यन्ते। एवं सुसम्पन्नं सुन्दरं वैविध्यपूर्णं विश्वमिदं पञ्चभूतात्मकमिति वदन्ति। अतः भूमिः, जलं, वायुः, आकाशं, तेजः इत्येतेषां संरक्षणम् अस्माभिः अवश्यं करणीयमिति अवबोधोत्पादनमेव पठस्यास्य उद्देश्यम्। प्रकृतौ दृश्यमानानि वस्तूनि अधिकृत्य कवितारूपेण अत्र वर्णयति। प्रकृतिविभवानां संरक्षणमेव अस्य कवितायाः मुख्याशयः। परितः इति शब्दस्य प्रयोगविशेषः, उपसर्गाणां परिचयः च भाषापरौ अंशौ।

**प्रवेशकप्रवर्तनम्** विविधानि प्रकृतिदृश्यानि ऐ.सि.टि द्वारा अथवा चित्रद्वारा प्रदर्श्य अथवा प्रश्नान् पृष्ट्वा च पाठप्रवेशकप्रवर्तनम् करणीयम्।

**पाठापग्रथनम्** काचित् बालिका स्वस्य परितःस्थितानां प्रकृतिदृश्यानां मनोहारितया आकृष्टा भूत्वा तदधिकृत्य बालकविताम् आलपति। प्रकृतेः परिपालनविषये वयं सर्वे सन्नद्धाः स्याम इति प्रतिबोधयति च।

**पठनप्रवर्तनानि।**

**प्रवर्तनम् - 1** **बालकवितानांताललयानुसारम् आलपनम्**

**पठनलक्ष्यम्** बालकवितां ताललयानुसारम् आलपति।

पठितपूर्वाणां बालकवितानाम् आलपनाय अध्यापिका छात्रान् निर्दिशति अथवा काश्चन बालकविताः ऐ.सि.टि द्वारा/साक्षात् वा श्रावयति। अनन्तरं ताललयानुसारं पाठभागस्य आलपनाय छात्रान् निर्दिशति। मूल्यनिर्णयं च करोति। (अध्यापक-सङ्घ-वैयक्तिकरूपेण)

**मूल्यनिर्णयसूचकानि।**

आशयावबोधः, उच्चारणस्फुटता, तालबोधः,

**प्रवर्तनम् - 2** **नूतनपदानि चित्वा अर्थं लिखतु।**

**पठनलक्ष्यम्** नूतनपदानामर्थं शब्दकोशं निरीक्ष्य लिखति।

शब्दकोशं निरीक्ष्य पाठभागस्थानां नूतनपदानाम् अर्थं प्रादेशिकभाषया संस्कृतभाषया वा लेखनाय निर्दिशति। शब्दकोशसम्पुटं निर्माति।

**मूल्यनिर्णयसूचकानि**

उचितपदचयनम् , अक्षरमालारूपेण क्रमीकरणम्, प्रादेशिकभाषायामर्थलेखनम्

**प्रवर्तनम् - 3** **उपसर्गयुक्तपदानि चित्वा लिखतु।**

**पठनलक्ष्यम्** उपसर्गान् अधिकृत्य विशेषज्ञानं सम्पादयति।

को नाम उपसर्गः? इति अध्यापिका प्रथममेव सोदाहरणं प्रस्तौति । (पाठभागस्थम् अधिकवाचनांशं पश्यतु- पु-13) अनन्तरं पाठभागे उपसर्गसहितानि यानि पदानि सन्ति तानि चित्वा लेखनाय निर्दिशति।

यथा :- विराजन्ते- प्रवाति- विभाति- प्रत्यायान्ति।

(ऐ. सि. टि द्वारा उपसर्गयुक्तपदानां प्रदर्शनं च करणीयम्।, अन्यत्र लेखनावसरे उपसर्गयुक्तपदानां प्रयोगाय निर्दिशतु)

**मूल्यनिर्णयसूचके**

उचितपदचयनम्, उपसर्गयुक्तानां क्रियापदानां विवेचनम्।

**प्रवर्तनम् - 4** **प्रयोगविशेषं ज्ञात्वा उदाहरणानुसारं वाक्यानि लिखतु।**

**पठनलक्ष्यम्** **परितः इति शब्दस्य प्रयोगविशेषं जानाति।**

परितः इति शब्दस्य योगे का विभक्तिः भवति? इति अध्यापिका सोदाहरणं वदति। अनन्तरं पाठभागस्थं प्रयोगं चित्वा लेखनाय

निर्दिशति। अभ्यासं च कारयति।

**मूल्यनिर्णयसूचके**

आशयावबोधः, उचितविभक्तिप्रयोगः।

| |
|---|
| 'अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' इति वार्तिकवचनेन अभितःपरितः प्रभृतीनाम् अव्ययानां योगे द्वितीयाविभक्तिर्भवति। |
| उदाः - ग्रामम् अभितः । वृक्षं परितः । |
| विद्यालयं परितः वृक्षाः सन्ति। पुष्पं परितः भ्रमराः सन्ति। |
| गृहं परितः प्राकाराः सन्ति। आराधनालयं परितः भक्ताः सन्ति। |

**प्रवर्तनम् - 5** **कवितायाः आशयं सूचनानुसारं लघूपन्यासरूपेण परिवर्त्य लिखति।**

**पठनलक्ष्यम्** कवितायाः आशयं स्वांशीकृत्य स्ववाक्यैः लघूपन्यासं लिखति।

उपन्यासलेखनाय काश्चन सूचनाः अत्र प्रदत्ताः । ताः केवलम् आशयावगमनाय कल्पिताः ताः स्वीकृत्य स्ववाक्यैः उपन्यासः लेखनीयः।

**मूल्यनिर्णयसूचकानि**

**आशयावबोधः, वाक्यघटना, लेखनसामर्थ्यम्।**

**मातृका**

सूचना - विश्वसौन्दर्यम्- पञ्चभूतानि - नदीतटागादयः-
वृष्टिः- ऋतवः-परितःस्थितेः पालनम्।

अस्माकं निवासभूमिः अतीवसुन्दरा भवति। सर्वेषां चराचराणां वासस्थानमियं स्वर्गीयसमानं सुखं सर्वदा वितरति। अनेके पर्वताः, नद्यः, केदाराः, उपवनानि च अत्र विराजन्ते। तरुलतादिभिः सम्पन्नेस्मिन् वने सुगन्धपवनः वाति। ऋतुभेदेषु नानाविधानि कुसुमानि विकसन्ति। एवं सर्वप्रकारेण सौन्दर्यसम्पन्नमिदं विश्वम् अस्माभिः सर्वथा परिपालियितव्यं भवति।

**प्रवर्तनम् - 6** **समानाशययुक्तानां बालकवितानां सम्पुटं रचयतु।**

**पठनलक्ष्यम्** प्रकृतिसौन्दर्यप्रतिपादकानां कवितानां प्रत्यभिज्ञानम्।

अन्येभ्यः ग्रन्थेभ्यः तथा भाषाभ्यः प्रकृतिसौन्दर्यमिति आशयप्रतिपादकानि काव्यानि समाहृत्य सम्पुटं रचयति। तदर्थं अम्बा नाम कवितासमाहारपुस्तकमपि (संस्कृतमाधुरी-वोल्यं) उपयोक्तव्यम्।

**मूल्यनिर्णयसूचकानि**

आशयज्ञानम्, समाहरसामर्थ्यम्, औचित्यम्।

**प्रवर्तनम् -7** **उपसर्गयुक्तपदानां विविच्य लेखनम् ।**

**पठनलक्ष्यम्** उपसर्गसहितानां पदानां प्रत्यभिज्ञानम्।

सामान्यानि उपसर्गयुक्तानि च क्रियापदानि मिश्रीकृत्य छात्रेभ्यो ददाति। तस्मादपि उपसर्गसहितानि क्रियापदानि चित्वा लेखनाय च निर्दिशति।

क्रियापदानि।

पठति, विरमति, नमामि, आगच्छति, समाहरति, प्रहरति, प्रविशति, हरति, विहरति, क्षिपति, प्रणमति, संस्तुवन्ति, समागच्छति, प्रक्षालयति, विचिन्तयति, निक्षिपति, जिज्ञासयति, भवति, आविर्भवति, प्रादुर्भवति, करोति, आविष्करोति, परिष्करोति, निर्मार्जयति, निराकरोति, अलंकरोति।....

**मूल्यनिर्णयसूचकानि**

आशयज्ञानम्, उचितपदानां चयनम्, क्रमीकरण रीतिः।

विशिष्य बोधव्यम्।

प्रादुर्, आविस्, अलम् इत्यादीनि अव्ययानि प्रादिषु द्वाविंशतिसंख्यकेषु उपसर्गेषु न भवन्ति इति

प्रत्येकं बोधनीयम्। अतः आविष्करोति, प्रादुर्भवति, अलंकरोति, नमस्करोतु इत्येतानि उपसर्गयुक्तपदानि इति वक्तुं न शक्यते। न केवलं क्रियापदेषु किन्तु नामपदेष्वपि उपसर्गयोजना भवति। यथा - प्रहारः, आहारः, संहारः,विहारः परिहारः, दुर्मतिः, सुमतिः, सुजनः, दुर्जनः, सुलभः, निर्दोषः...।

**प्रवर्तनम् -8** **पाठभागस्थं गीतकं प्रादेशिकभाषायां यावच्छक्यं गीतरूपेण परिवर्त्य लिखति।**

**पठनलक्ष्यम्** प्रादेशिकभाषायां विवर्तनसामर्थ्यम् ।

**विश्वसौन्दर्यं नाम कविता वृत्तानुसारं परिवर्त्य मातृभाषायां लेखितुं निर्दिशति ।अध्यापकः अवश्यं सहाय्यं च ददाति।**

**मूल्यनिर्णयसूचकानि**

**उचितवृत्तस्वीकरणम्, आशयपूर्णता, काव्यसौन्दर्यम्**

**विवर्तनमातृका -**

വിശാലസുന്ദരലോകം കാണ്മൂ
നയനാനന്ദകരം
സർവചരാചരവാസസ്ഥാനമി-
തതുല്യമെൻ സ്വർഗം

നില്പൂ പർവതമനേകമിവിടെ
പ്രവഹിപ്പൂ നദികൾ
കാടുകൾ വയലുകളുദ്യാനങ്ങൾ
പകരുന്നൂ സൗഖ്യം

കിണറുകൾ പൊയ്കകൾ വൃക്ഷലതാദിക-
ളിവിടെ വിരാജിപ്പൂ
സുഗന്ധപവനൻ വീശീടുന്നൂ
വിളങ്ങിടുന്നർക്കൻ

കാലംതോറും പെയ്തീടുന്നൂ
പുതുനീർ മേഘങ്ങൾ
പുഷ്പഫലങ്ങളുമേന്തി വരുന്നു-
ണ്ടൃതുക്കളോരോന്നും
നമുക്കു ചുറ്റും നാമ്പിട്ടുയരും
സുസ്ഥിതിയിതുതന്നെ
ഇതിന്റെ പരിപാലനമതിനെന്നും
യോഗ്യർ നാം തന്നെ..

(മൂലം, വിവർത്തനം- ഹരിപ്രസാദ് കടമ്പൂർ)

**प्रवर्तनम् -8** **कवितां पठित्वा आशयानुसारं प्रकृतिचित्रं विलिख्य वर्णलेपनं करोतु।**

**पठनलक्ष्यम्** चित्रीकरणसामर्थ्यम्

पाठभागस्थान् आशयान् स्वीकृत्य यावच्छक्यं प्रकृतिचित्रं विलिख्य (पत्रे/ऐ.सि. टि द्वारा) वर्णलेपनाय निर्दिशति।

**मूल्यनिर्णयसूचकानि**

औचित्यम्, आशयज्ञानम्, क्रमीकरणसौन्दर्यम् ।

**अग्रिमपाठसंयोजक--प्रवर्तनम्** प्रकृतेः सौन्दर्यं ज्ञात्वा चित्रीकरणं करोति। प्रकृतेः सौन्दर्यनाशनमपि सर्वत्र दृश्यते। तत् कथं भवति? तस्य परिहाराय किं कर्तव्यम् इति विषये चर्चां चालयति। सस्यानां नाशनं प्रकृतिसौन्दर्यनाशनेषु अन्यतमं भवति इति क्रोडीकरोति।

**अनुबन्धः 1** **कोशपरिचयः ।**

पल्लवम् – नवपत्रम्। पल्लवोस्त्री किसलयं(पल्लवः/पल्लवम्)

अचलः – पर्वतः।अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः।

उपवनम् – उद्यानम्। आरामःस्यादुपवनं कृत्रिमं वनमेव यत्।

नाकः – स्वर्गः। स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः।

खद्योतः – सूर्यः। प्रद्योतनो दिनमणिः खद्योतो लोकबान्धवः।

अरण्यम् – वनम्। अटव्यरण्यं विपिनं गहनं काननं वनम्।

केदारः – कृषिभूमिः। पुन्नपुंसकयोर्वप्रः केदारः क्षेत्रमस्य तु।

अनुबन्धः 2

आढ्यः – सम्पन्नः। इभ्भः आढ्यो धनी ।

**उपसर्गयुक्तानां केषाञ्चन क्रियापदानां पट्टिका।**

| उपसर्गः | क्रियारूपम् |
|---|---|
| प्र | प्रवहति, प्रविशति, प्रहरति, प्रार्थयति, प्रकाशते। |
| परा | पराभवति, परापतन्ति, परैति, पराजयते, पराक्रमते। |
| अप | अपसरति, अपगच्छति, अपवदति, अपैति, अपेक्षते। |
| सम् | सम्भवति, सम्मिलति, सङ्कोचयति, सङ्गच्छते, समर्थयते। |
| अनु | अनुभवति, अनुसरति, अनुतपति, अनुयाति, अनुकरोति। |
| अव | अवरोहति, अवगच्छति, अवैति, अवार्च्छति, अवेक्षते। |
| निस् | निस्तरति, निष्क्रामति, निष्कासयति, निष्कर्षयति, निष्कुरुते। |
| निर् | निर्गच्छति, निर्माजयति, निरूहति, निर्गलति, निरीक्षते। |
| दुस् | दुश्चरति, दुस्तरति, दुस्पृशति, दुस्स्मरति, दुष्कुरुते। |
| दुर् | दुर्गच्छति, दुरभिलषति, दुराचरति, दुर्मिलति, दुर्भाषते। |
| वि | विकसति, विलपति, वितरति, विभजते, वितनुते। |
| आङ् | आरोहति, आगच्छति, आलपति, आनयति, आचिनोति। |
| नि | निवारयति, निवसति, निक्षिपति, निमज्जति, निकषते। |
| अभि | अभिजानाति, अभ्यर्चति, अभ्यर्हति, अभ्यसति, अभिभाषते। |

| | |
|---|---|
| अपि | (अ) पिदधाति, अप्यूहति, अपिकृन्तति, अपिनयति,अप्येति। |
| अति | अतिक्रामति, अत्यर्हति, अत्येति, अतितिष्ठति, अतिशेते। |
| अधि | अधिगच्छति, अधिक्षिपति, अध्येति, अधिक्रामति,अधिरक्षति। |
| प्रति | प्रत्येति, प्रतिगच्छति, प्रतिकूजति, प्रतीयते, प्रतीक्षते। |
| सु | सुतिष्ठति, सुकुरुते, सुशोभते, सुभाषते, सुगम्यते। |
| उद् | उद्घाटयति, उदाहरति, उत्पतति, उन्नमति, उत्प्लवते। |
| परि | परिपालयति, परिणयति, परिष्करोति, परितप्यते, परिवर्तते। |
| उप | उपकरोति, उपार्जति, उपवसति, उपोक्षति, उपास्ते। |

**കുറിപ്പ്** 1- ചില ഉപസർഗങ്ങളുടെ അന്ത്യസ്വരം ഘഞ് അന്തങ്ങളായുള്ള ഉത്തരപദത്തോട് ചേരുമ്പോൾ ദീർഘിക്കാറുണ്ട്. പ്രതികാരഃ/പ്രതീകാരഃ, പരിഹാസഃ/പരീഹാസഃ, അധികാരഃ / അധീകാരഃ എന്നിങ്ങനെ. ഇവിടെ രണ്ടുരൂപങ്ങൾക്കും ഒരേ അർത്ഥമായിരിക്കും. എന്നാൽ ചില ഉപസർഗ്ഗങ്ങൾ ദീർഘിച്ചാൽ അർത്ഥഭേദം വന്നേക്കാം. ഉദാ - പ്രസാദഃ (തെളിച്ചം), പ്രാസാദഃ (മാളിക), പ്രകാരഃ(വിധം), പ്രാകാരഃ (മതിൽ). അധികവിവരത്തിന് “ഉപസർഗസ്യ ഘഞ്യമനുഷ്യേ ബഹുലം” (6-3-122), “സാദകാരയോഃ കൃത്രിമേ ദീർഘഃ” തുടങ്ങിയ നിയമങ്ങൾ നോക്കുക.

**കുറിപ്പ്-2** ഉപസർഗങ്ങൾ ചേരുമ്പോൾ ചില പരസ്മൈപദി ധാതുകൾ ആത്മനേപദങ്ങളായും ചില അത്മനേപദി ധാതുക്കൾ പരസ്മൈപദിയായും മാറുന്നു.

ഉദാ- ജയതി - വിജയതേ, പരാജയതേ. രമതേ- വിരമതി- ആരമതി

# पाठः २ जीवातुरेव द्रुमः

| | | |
|---|---|---|
| **आशय:** | : | परितस्थिति: विकासश्च। |
| **उपाशय:** | : | सस्यसंरक्षणम्। |
| **व्यवहाररूपम्** | : | कथा। |
| **उद्देश्यानि/लक्ष्याणि** | : | सस्यानि जीवस्य आधारभूतानि इति प्रत्यभिजानाति। |
| | | सस्यानां संरक्षणम् अस्माकं कर्तव्यमिति प्रत्यभिजानाति। |
| **मूल्यम्/मनोभावः** | : | प्रकृतिः परिपालनीया। |
| | | सस्यानि सर्वथा संरक्षणीयानि। |
| **पठनलक्ष्याणि** | : | कथां पठित्वा सम्भाषणं लिखति। |
| | | सूचनानुसारं जीवनचरितं लिखति। |
| | | समानार्थकपदानि चित्वा लिखति। |
| | | भूतकालक्रियापदानि उपयुज्य वाक्यानि लिखति। |
| | | क्त्वान्त-ल्यबन्त-तुमुन्नन्त-अव्ययानां पट्टिकां लिखति। |
| **पठनक्षमता** | : | सस्यानि संरक्षणीयानि इति जानाति। |
| | | आशयं स्वांशीकरोति। |
| | | कथारचनासामर्थ्यम् आर्जयति। |
| **कालांश:** | : | 12 |

**पाठस्य आमुखम्**

प्रथमे पाठे वृक्षलतादिभिः सम्पन्नस्य विश्वस्य सौन्दर्यमधिकृत्य वयम् अपठाम। इदानीम् अस्मिन् पाठे वृक्षलतादीनां संरक्षणस्य प्राधान्यमधिकृत्य पठामः। सस्यानि अपि मानवा इव प्राणान् धरन्ति सुखदुःखान्यनुभवन्ति च। महाभारतादिषु पौराणिकग्रन्थेषु सस्यानां जीवनं वा न वा इति विषये चर्चां द्रष्टुं शक्यते। अधुनिककाले सस्यशास्त्रज्ञः जे.सी.बोस् महाशयः सस्यानां जीवनमस्ति इति स्थिरीचकार। जीवातुरेव द्रुमः इति पाठेऽस्मिन् एतद्विषयसम्बन्धिनीं काञ्चन लघुकथां पठामः।

**प्रवेशकप्रवर्तनम्**

ऐ. सि. टि. द्वारा वृक्षलतादीनां पक्षिमृगादीनां कृमिकीडादीनां चित्राणि/वीडियो प्रदर्शयन्ति। अनन्तरं प्रपञ्चे के के प्राणान् धरन्ति? चेतनानि अचेतानि कानि? स्थावराणि कानि? जङ्गमानि कानि? इत्यादीन् प्रश्नान् पृच्छतु। जीवजालानि चतुर्विधानि सन्ति इति परिचायनमपि करोतु।

**जीविनां चतुर्विधत्वम्।**

उद्भिजम्, अण्डजम्, स्वेदजम्, जरायुजम् इति जीविनः चतुर्विधाः सन्ति। ये मृद्भित्वा जायन्ते ते तरुलतादयः उद्भिजाः। ये अण्डात् जायन्ते ते खगसर्पादयः अण्डजाः। स्वेदात् जाताः कृमिदंशाद्याः स्वेदजाः। जरायुः नाम गर्भाशयः। तस्मात् ये जायन्ते ते नरमृगाद्याः जरायुजाः इति च कथ्यन्ते।

उद्भिदस्तरुगुल्माद्याः
नृमृगाद्या जरायुजाः ।
स्वेदजाः कृमिदंशाद्याः
पक्षिसर्पादयोऽण्डजाः ।। -इत्यमरः।

**पाठापग्रथनम्**

केचित् बालकाः क्रीडामध्ये कस्यचन बालवृक्षस्य शाखां कर्तयितुं यतन्ते। तत् दृष्ट्वा काचन महिला तन्निवारयति। वृक्षस्य जीवनमस्ति वा? न वा? इति बालकानां सन्देहदूरीकरणाय पौराणिकानां तथा आधुनिकसस्यशास्त्रज्ञानां तत्सबन्धिनं विवरणम् अध्यापकः लघुवाक्यैः कथयति।

परितःस्थितेः संरक्षणाय वृक्षसंरक्षणमेव प्राक्करणीयम्। अस्मान् परितः वृक्षलतादयः सर्वत्र सुलभतया सन्ति चेत् शुद्धवायुः लभ्यते। अत्युष्णस्य शान्तिः भविष्यति। भूगर्भे जलसंभरणं भवति। मृत्प्रवाहं निरुन्धति।विश्वस्य सौन्दर्यमपि विवर्धते च इति चिन्तां जनयितुं पाठोऽयं सहायकरः भवन्ति। अपि च भारतीयानां पौराणिकं नवीनं च शास्त्रविज्ञानमधिकृत्य जिज्ञासां जनयति ।

**पठनप्रवर्तनम्**

**प्रवर्तनम् - 1** **कथां पठित्वा सम्भाषणं रचयतु।**

**पठनलक्ष्यम्** **संस्कृतभाषया सम्भाषणं कर्तुं लेखितुं च ज्ञानम् आर्जयति।**

अध्यापकः सस्यसंरक्षमधिकृत्य व्यक्तिशः एकं सम्भाषणं लेखनाय निर्दिशति। यथावसरम् उचितसाहाय्यमपि ददाति । वाचनानन्तरं सम्पुटरूपेण कक्ष्यायां प्रदर्शयति।

<u>मातृका</u>

छात्रः (अध्यापकं मार्गे दृष्ट्वा) - नमस्ते आचार्य!

अध्यापकः - नमस्ते को विशेषः।(तस्य हस्तं दृष्ट्वा) तव हस्ते किमस्ति ?

छात्रः - जपाकाण्डः। सोमस्य गृहात् आनयामि।

अध्यापकः - अद्यैव तत् रोपणं करिष्यति खलु ?

छात्रः - आम्। अद्यैव रोपयिष्यामि। नो चेत्

तच्छुष्को भविष्यति।

अध्यापकः - उत्तमम्। सस्यानां रोपणं पालनञ्च सदा करणीयम् ।

छात्रः - धन्यवादः श्रीमन्।

**मूल्यनिर्णयसूचकानि।**

आशयज्ञानम्, प्रश्नवाचकशब्दानामुपयोगः, उपचारशब्दानां प्रयोगः

**प्रवर्तनम् - 2** **भूतकालक्रियापदानि चित्वा वाक्यानि रचयतु**

**पठनलक्ष्यम्** **भूतकालक्रियापदानां प्रयोगसामर्थ्यं प्राप्नोति।**

पाठभागे अनेकानि भूतकालक्रियापदानि सन्ति। तानि उपयुज्य अर्थपूर्णानि वाक्यानि यावच्छक्यं रचयतु।यः अधिकानि वाक्यानि रचयति तमभिनन्दयतु।

यथा-: -

अकरोत् - रबीन्द्रनाथठक्कुरः गीताञ्जलिनामकं गीतकम् अकरोत्।

आरभन्त - गीताञ्जलिं पठित्वा अनेके तस्य विवर्तनं कर्तुं प्रयत्नम् आरभन्त।

अवदत् - मातामही पौत्रं कथाम् अवदत्।

**मूल्यनिर्णयसूचके**

अर्थावगमनम्, उचितरीत्यावाक्येषु प्रयोगः

**प्रवर्तनम् - 3** **अव्ययानां पट्टिकाकरणम्।**

**पठनलक्ष्यम्** अव्ययानि विविच्य जानाति

पाठभागस्थितानां क्त्वान्त - तुमुन्नन्त - ल्यबन्तानाम् अन्येषामव्ययानां च पट्टिकाकरणाय निर्दिशतु। अन्येषाम् अव्ययानां सामान्यपट्टिकाम् अनुबन्धे दत्तामपि परिचाययतु।

**मूल्यनिर्णयसूचके**

विवेचनसामर्थ्यम्, उचितकोष्ठेषु विन्यसनम्।

**प्रवर्तनम् - 4** **जीवनचरितलेखनम्।**

**पठनलक्ष्यम्** सूचनानुसारं लघुजीवनचरितं लेखितुं सामर्थ्यमार्जयति।

सूचनानुसारं जीवनचरितलेखनं तथा जीवनचरितं पठित्वा सूचकानां यथोचितपूरणं च करणीयम्। तदर्थम् एका मातृका अत्र दीयते।

**भारतरत्नं डा. एम् .एस् स्वामिनाथन्।**

'भारतहरितक्रान्तेः पिता' इति प्रसिद्धः भवति डा. एम्. एस्. स्वामिनाथन् महोदयः। सः 1925 तमे वर्षे आगस्ट् मासस्य सप्तमे दिनाङ्के जनिमलभत। तमिल्नाट् राज्यस्य कुम्भकोणमस्ति तस्य जन्मदेशः। डा. के.सदाशिवः तङ्कं च तस्य पितरौ स्तः। कार्षिकमण्डलेषु तेन कृतानि परिष्काराणि अतीव श्रद्धेयानि भवन्ति। अतः सः हरितक्रान्तेः पिता इति पश्चात्प्रसिद्धो जातः। माग्सासे पुरस्कारः, पद्मश्रीः, पद्मभूषण् इत्यादिभिः पुरस्कारैः पूर्वमादृतोऽयं महानुभावः 2024 तमे वर्षे मरणानन्तरं भारतरत्नपुरस्कारेणापि समादृतोऽभूत्। 2023 सेप्तब्वर् 28 अस्ति तस्य मृत्युदिनम्।

| | | |
|---|---|---|
| नाम | - | एम् .एस् स्वामिनाथन्। |
| जन्म | - | 1925 आगस्ट् 7। |
| जन्मदेशः | - | कुम्भकोणम्,तमिल्नाट्। |
| पितरौ | - | डा. के.सदाशिवः तङ्कम् । |
| पुरस्काराः | - | माग्सासे पुरस्कारः, पद्मश्रीः, पद्मभूषण, भारतरत्नम्। |
| प्रशस्ति | - | भारतहरितक्रान्तेः पिता। |
| मृत्युः | - | 2023 सेप्तम्बर् 28। |

| | |
|---|---|
| **प्रवर्तनम् 5** | **विश्वपरितःस्थितिदिनाचरणम् इति विषयमधिकृत्य चित्ररचना, प्रभाषणञ्च करणीयम्।** |
| **पठनलक्ष्यम्** | **परिस्थितिसंरक्षणमधिकृत्य सामान्यावबोधः जायते।** |
| | प्रभाषणं कर्तुं ये समर्थाः ते प्रभाषणं कुर्वन्तु। चित्राणि रचयितुम् अथवा वीडियोरूपेण चित्रीकर्तुं ये समर्थाः ते तदपि कुर्वन्तु ।यथावसरं अध्यापकः साहाय्यमपि ददातु। |
| | **मूल्यनिर्णयसूचकानि** |
| | प्रभाषणसामर्थ्यम्, आशयज्ञानम्, चित्रीकरणसैन्दर्यम्, औचित्यम्। |
| **अग्रिमपाठसंयोजकं - प्रवर्तनम्** | परितःस्थितेः अनुकूलता अस्माकं बाह्यसुरक्षायै प्रथमगणनीया भवति। तद्वत् अस्माकं शारीरिकसुरक्षायै किं किं करणीयं भवति? तेषु च प्रथमपरिगणनार्हं किम्? तदधिकृत्य चर्चां नयतु। छात्राणामभिमतानि क्रोडीकुर्वन्तु। |
| **अनुबन्धः 1** | **महाभारतस्य शान्तिपर्वणि प्रतिपादितः भृगुभरद्वाज संवादः।** |
| | महाभारतस्य शान्तिपर्वणि चतुरशीत्यधिकशततमोऽध्याये भृगु-भरद्वाजसंवादे सस्यानां जीवोऽस्ति इति विषये चर्चा भवति। 'सस्यानि न शृण्वन्ति न पश्यन्ति गन्धरसान् न विन्दन्ति स्पर्शं न विजानन्ति । अतः तानि प्राणरहितानि तथा अचेतनानि भवन्ति' इत्यस्ति भरद्वाजस्याभिमतः तच्छ्रुत्वा भृगुस्तु कैश्चित् दृष्टान्तैः सस्सान्यपि प्राणान् धरन्ति इति व्यनक्ति। सस्यानि उष्णेन म्लायन्ते, तथा पुष्पफलानि च म्लायन्ते शीर्यन्ते च। अतः तेषां स्पर्शनज्ञानमस्ति। अग्निवाय्वशनीनां निर्घोषेण च तेषां पुष्पफलानि विशीर्यन्ते। अनेन हेतुना तेषां श्रवणशक्तिरस्ति इति वक्तुं शक्यते। यस्मिन् दूरे वृक्षास्तिष्ठन्ति तद्दूरं गत्वा लताः वृक्षान् वेष्टयन्ते। तासां दृष्टयः न सन्ति चेत् गमनमार्गं |

कथं विन्दन्ति। वृक्षणां पार्श्वे धूपयति चेत् ते रोगरहिताः सन्तः पुष्पिताः भवन्ति। अतः तेषां घ्राणशक्तिरप्यस्ति। वयं नालिकया कथं जलमूर्ध्वमानीय पिबामः तद्वत् ते पादैः सलिलमानीय पिबन्ति इत्यनेन पादपाः इति ज्ञायन्ते। तेषु व्याधीनां दर्शनेन व्याधिप्रतिक्रियया रोगशमनेन च तथा छिन्नस्य पुनः प्ररोहेण च ते सुखदुःखान्यनुभवन्ति च। एवं स्वविज्ञानमनुसृत्य भृगुः वृक्षाः जीवचैतन्ययुक्ताः इति समर्थयति। "जीवं पश्यामि वृक्षाणाम् अचैतन्यं न विद्यते" - इति महाभारतवचनं पौराणिकानां सस्यविज्ञानमधिकृत्य अस्मान् विबोधयति।

**अनुबन्धः 2** **जगदीष् चन्द्रबोस् (1858-1937)**

भारतीयसस्यशास्त्रज्ञेषु अन्यतमोऽस्ति जगदीष् चन्द्रबोस्। प्राणिनाम् इव सस्यानाम् अपि जीवः अस्ति इति सः परीक्षणनिरीक्षणैः संस्थापितवान् । तानि अपि व्रणितानि भवन्ति । तेषाम् अपि आघातः भवति । रासायनिकानां प्रयोगेण सस्यानि अपि प्रज्ञाहीनानि कर्तुं शक्यन्ते इति गवेषणसारं १९०१ वर्षे लण्डन्–नगरस्थायाः रायल्–सोसैट्याः अन्ताराष्ट्रिय–विज्ञानसम्मेलने सः उदघोषयत्। सस्यानां सूक्ष्मं संवेदनम् अपि अभिज्ञातुं "रेसोनेण्ट्" नामकम् उपकरणम् अपि निर्मितवान् । अयं जगदीशचन्द्रबोसः सस्यजीवनस्य विषये स्वेन कृतान् प्रयोगान्, तेषां प्रयोगाणां फलं चापि "जीविनां निर्जीविनां च प्रतिक्रिया" (The Reaction of Living & Nonliving) इति पुस्तके उल्लिखितवान् अस्ति । तत् पुस्तकं १९०२ वर्षे प्रकाशितम् ।

**कोशपरिचयः**

यष्टिः - दण्डः। दण्डो यष्टिश्च लगुडः।

असुः - जीवः।पुंसी भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणम्।
(असुःशब्दः जीवः इत्यर्थे एकवचनम्।प्राणाः इत्यर्थे असवः इति नित्यबहुवचनम्)

**धातुपरिचयः** दधते। डुधाञ् धारणपोषणयोः।उभयपति

कर्तरि लट्- आत्मनेपदि

| | | |
|---|---|---|
| धत्ते | दधाते | दधते |
| धत्से | दधाथे | धद्ध्वे |
| दधे | दध्वहे | दध्महे |

# एककम् २
# पलाशम्

## आमुखम्

यथा पल्लवं गच्छता कालेन पलाशत्वं प्राप्नोति तद्वत् छात्राः ललितपाठयोः पठनेन विज्ञानमार्जयित्वा प्रौढतराः जायन्ते। एतदवसरे व्यवहाररूपेष्वपि किञ्चित् प्रौढतरत्वं प्रदर्शयति पलाशाख्ये अस्मिन्नेकके। अत्र स्वास्थ्यप्रतिपादकः **सुखजीवनं** नाम सुभाषितपाठः, **क्षुधाा ज्ञानप्रदायिनी** इति काचिच्चम्पूः, **हितमेवाश्नुयात् सदा** इति सम्भाषणपाठश्च आयोजितः।

पाठः ३

# सुखजीवनम्।

| | | |
|---|---|---|
| **आशयः** | : | भक्षणम् आरोग्यम्। |
| **उपाशयः** | : | आरोग्यशीलानि। |
| **व्यवहाररूपम्** | : | सुभाषितम्। |
| **उद्देश्यानि/लक्ष्याणि** | : | आरोग्यसंरक्षणे व्यायामस्य हिताहारस्य च प्राधान्यं जानाति।<br>सुभाषितानां महत्वं ज्ञायते। |
| **मूल्यम्/मनोभावः** | : | जीवनशैलीरोगाणां प्रतिरोधाय व्यायामः करणीयः।<br>मितस्य हितस्य च आहारस्य उपयोगः करणीयः। |
| **पठनलक्ष्याणि** | : | सुभाषितानि सतालमालपति।<br>सुभाषितानामाशयमवगच्छति, लिखति च।<br>आरोग्यविषये लघुटिप्पणीं लिखति।<br>सुभाषितानां गद्यक्रमं लिखति।<br>सुभाषितसम्पुटं निर्माति।<br>समस्तपदानां विग्रहं लिखति।<br>संश्लिष्टपदानि विश्लिष्य लिखति। |
| **पठनक्षमता** | : | आरोग्यविषये व्यायमस्य आवश्यकतां ज्ञात्वा लिखति।<br>सुभाषितानाम् आशयं स्वांशीकरोति।<br>गद्यक्रमं लिखति। |
| **कालांशः** | : | 10 |

**पाठस्य आमुखम्** पौराणिककालादारभ्य मानवाः आरोग्यसंरक्षणविषये दत्तश्रद्धाः अभवन्। मिताहारेण हितेन व्यायामेन पथ्यानुष्ठानेन च सुस्थितिः भविष्यतीति ज्ञातवन्तः ते तेषामनुभवज्ञानं विविधरूपेण उपदिशन्ति। अधुना रुग्णः जनः रोगारम्भ एव भिषग्वरान् उपगच्छति। पथ्याहारस्य विश्रमस्य च अनुष्ठानेन रोगशमनं भवतीति न चिन्तयति। रोगप्रतिरोधरशक्तिं प्रवर्धयितुं पथ्याहारेण व्यायामेन च शक्यते । एतादृशीं चिन्तामुपत्पादयितुं कायिकविद्याभ्यासस्य आवश्यकताम् अवबोधयितुं समर्थोऽयं पाठः।

**प्रवेशकप्रवर्तनम्** प्रकृतिसंरक्षणमिव आत्मनः संरक्षणमपि सर्वथा करणीयं भवति।स्वस्थ एव सुखजीवनं यापयति। सुखजीवनाय किं करणीयम्? "शरीरमाद्यं खलु धर्मसाधनम्" इति कालिदाससूक्तिः श्रुतवन्तः किल? पठितपूर्वाणि आरोग्यविषयकाणि सुभाषितानि आलपन्ति तदधिकृत्य चर्चां च नयन्ति। सुखजीवनम् इति अस्माकं पाठभागे आरोग्यसंरक्षणाय रोगाणां प्रतिरोधाय च पथ्यस्य तथा व्यायामस्य च प्राधान्यम् अवगमयितुं केचन श्लोकाः पठामः।

**पाठापग्रथनम्** चरकस्य चरकसंहिता, सुश्रुतस्य सुश्रुतसंहिता, कश्यपस्य काश्यपसंहिता, शार्ङ्गधरस्य शार्ङ्गधरसंहिता भावमिश्रस्य भावप्रकाशः, वाग्भटस्य अष्टाङ्गसंग्रहः, अष्टाङ्गहृदयः इत्यादयः प्रसिद्धाः आयुर्वेदग्रन्थाः भवन्ति। एतेषु ग्रन्थेषु स्वास्थ्यसंरक्षणोपायाः असकृत् प्रतिपादिताः। सुखजीवनं नामके अस्मिन् पाठभागे सुश्रुतसंहितायाः स्वीकृताः चत्वारः श्लोकाः दत्ताः।

**पठनप्रवर्तनानि**

**प्रवर्तनम् - 1** **श्लोकान् सतालमालपतु ।**

**पठनलक्ष्यम्** श्लोकान् आशयावबोधेन सह आलपितुं शक्यते।

छात्रान् सङ्घान् कृत्वा पाठभागस्थम् एकैकं सुभाषितम् एकैक सङ्घाय ददाति। उचितैः तालैः भावलयानुसारं सुभाषितस्य आलपनाय सङ्घान् निर्दिशति। सम्यक् आलपितान् सङ्घान् अनुमोदयति। आलपने जातान् दोषान् परिहरति च।

**मूल्यनिर्णयसूचकानि**

आलापनशैलीः, आशयावबोधः, उच्चारणस्फुटता।

**प्रवर्तनम् - 2** **नूतनपदानि चित्वा अर्थं लिखतु।**

**पठनलक्ष्यम्** अभिनवानां पदानाम् अर्थावबोधं प्राप्नोति।

शब्दकोशं निरीक्ष्य पाठभागस्थानां नूतनपदानाम् अर्थं प्रादेशिकभाषया संस्कृतभाषया च लेखनाय निर्दिशति।प्रवर्धमानं शब्दकोशं च निर्माति।

**मूल्यनिर्णयसूचकानि**

उचितपदस्वीकरणम्, अर्थावबोधः, अकारादिरीत्या क्रमीकरणम्।

**प्रवर्तनम् - 3** **गद्यक्रमं लिखति**

**पठनलक्ष्यम्** श्लोकं पठित्वा अन्वयलेखनाय सामर्थ्यमार्जयति।

अध्यापकः श्लोकानां गद्यक्रमलेखनाय आकांक्षारूपेण प्रश्नान् पृच्छति।प्रश्नानुसारं विशेषणविशेष्याणि च अवश्यं योजयित्वा श्लोकस्य अन्वयक्रमं बोधयति।

यथा-

| | | |
|---|---|---|
| क्रियापदं किम् | - | निवर्तते। |
| का निवर्तते | - | व्याधिः। |
| कैः विना व्याधिः निवर्तते | - | भेषजैः। |
| कस्य रोगः न निवर्तते | - | पथ्यविहीनस्य। |
| कैः न निवर्तते | - | शतैः। |
| केषां शतैः | - | भेषजानां शतैः। |

इत्यनेन प्रकारेण गद्यक्रमलेखनाय निर्दिशति। सर्वेषां पदानां स्वीकरणेन आशयानुसारेण औचित्यपूर्णतया च गद्यक्रमं लेखनीयम्।

**मूल्यनिर्णयसूचकानि**

आशयावबोधः, वाक्यघटना, सर्वेषां पदानां स्वीकरणम्।

**प्रवर्तनम् - 4** **श्लोकानाम् आशयं स्ववाक्यैः लिखतु।**

**पठनलक्ष्यम्** पद्यस्य आशयलेखनसामर्थ्यं लभते।

श्लोकानाम् आशयं प्रादेशिकभाषया संस्कृतभाषया च टिप्पणीपुस्तके लिखतु। उचितसाहाय्यमपि ददाति।

**मूल्यनिर्णयसूचके**

आशयपूर्णता, भाषाशैली,

**प्रवर्तनम् - 5** **आरोग्यविषये लघुटिप्पणीं लिखतु।**

**पठनलक्ष्यम्** विषयानुसारं टिप्पणीलेखनसामर्थ्यम् आर्जयति।

अध्यापकः टिप्पणीलेखनाय सूचनां प्रददाति।सूचनानुसारं टिप्पणीलेखनाय निर्दिशति।उचितानि साहाय्यानि ददाति च।

सूचना :- आरोग्यसंरक्षणम्- मिताहाराः- व्यायामः-जीवनशाली।

**मूल्यनिर्णयसूचकानि**

भाषाशुद्धिः, वाक्यघटना, आशयपूर्णता।

मातृका-

आरोग्यसंरक्षणे मिताहारस्य, हिताहारस्य, व्यायामस्य च प्राधान्यम् अधिकृत्य सर्वे जानन्ति। तथापि वर्त्तमानकाले एतेषाम् अनुष्ठानं सम्यक् कर्तुं यः कोपि न यतते। तस्मात् जीवनशैलीरोगाः इदानीं सर्वत्र परिपुष्टिं प्राप्नुवन्ति। बाल्य-यौवन-वार्धक्यभेदं विना जनाः रक्तादिमर्द्दः, प्रमेहः, भाराधिक्यम्, हृद्रोगः इत्येतैः रोगैः दूयमानाः भवन्ति।

**प्रवर्तनम् - 6** **स्वास्थ्यप्रतिपादकानि सुभाषितानि समाहृत्य सम्पुटं निर्मातु।**

**पठनलक्ष्यम्** गवेषणं कृत्वा विषयानुसारं दत्तशेखरणाय सामर्थ्यं लभते।

वैदिकीयसुभाषितानि, चरकसंहिता, नीतिसारं, अष्टाङ्गहृदयः इत्यादिषु ग्रन्थेषु आरोग्यसम्बन्धीनि अनेकानि सुभाषितानि सन्ति। तानि यथानुगुणं स्वीकृत्य सम्पुटं निर्मातुम् आवश्यकं साहाय्यं ददातु।

**मूल्यनिर्णयसूचकानि**

आशयावगमनम्, विषयानुसारं चयनसामर्थ्यम्, क्रमीकरणचारुता।

**<u>केचन श्लोकाः</u>**

पानीयं प्राणिनां प्राणा विश्वमेव च तन्मयम्।<br>
न हि तोयाद्विना वृत्तिः स्वस्थस्य व्याधितस्य वा।। (अष्टाङ्गसङ्ग्रहः)

मनःशुद्ध्यैव शुद्धिःस्यात् देहिनां नात्र संशयः।<br>
वृथा तद्व्यतिरेकेण कायस्यैव कदर्थनम्।। (ज्ञानार्णवः)

नैर्मल्यं भावशुद्धिश्च विना स्नानं न युज्यते।<br>
तस्मात् कार्यविशुद्ध्यर्थं स्नानमादौ विधीयते।। (भविष्यपुराणम्)

यावदस्मिन् शरीरे प्राणो वसति तावदायुः।। (कौशीतकी)

यावद् वायुः स्थितो देहे तावज्जीवनमुच्यते।<br>
मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत् ।। (हठयोगप्रदीपिका)

व्यायामः स्थैर्यकराणाम्।। ( चरकसंहिता)

शरीरायासजनकं कर्म व्यायामसंज्ञितम्।। (सुश्रुतसंहिता)

आयुः कामयमानेन धर्मार्थसुखसाधनम्।<br>
आयुर्वेदोपदेशेषु विधेयः परमादरः।। ( अष्टाङ्गहृदयः)

**प्रवर्तनम् - 7** **विविधानां व्यायमानां लघुचित्रीकरणं कृत्वा प्रदर्शयतु।**

**पठनलक्ष्यम्** आशयानुसारं चित्रीकरणसामर्थ्यम् ।

छात्राः वैयक्तिकरूपेण वा सङ्घरूपेण वा विविधानां व्यायामानां लघुचित्रीकरणं वीडियो द्वारा अथवा कोलाष् रूपेण वा यावच्छक्यं रचयति। कक्ष्यायाम् अवतारयति।

मूल्यनिर्णयसूचकानि

विषयानुबन्धी, औचित्यम्, क्रमीकरणचारुता।

**अग्रिमपाठसंयोजकं - प्रवर्तनम्** पथ्याहारेण तथा व्यायामेन आरोग्यपरिपालनं साध्यम्। किन्तु अनेके जनाः एकवारमपि भोजनम् अलभमानाः क्लिश्यन्ते। तदपि आरोग्यनाशने हेतुर्भवति। बुभुक्षया पीडितः किं किं न करोति? इति चर्चां कृत्वा क्रोडीकृत्य अग्रिमपाठं प्रविशति।

**अनुबन्धः 1** **सहायकग्रन्थसूची**

सुभाषितग्रन्थावली, वैदिकीयसुभाषितम्, योगविद्या।

**अनुबन्धः 2** **पाठस्थानां श्लोकानामाशयः।**

प्रथमश्लोकः- विनापि....शतैरपि ।।

മരുന്നുകൊണ്ടല്ല രോഗം പഥ്യംകൊണ്ടേ ശമിച്ചിടൂ ।
പഥ്യമില്ലെങ്കിലെന്തുണ്ട് നൂറുനൂറൌഷധങ്ങളാൽ ।।

द्वितीयश्लोकः- व्यायमं....परिपच्यते ।।

നിത്യം വ്യായാമം ചെയ്യുന്നവൻ കഴിക്കുന്ന ഭക്ഷണം അവനവന്റെ ശരീരത്തിന് വിരുദ്ധമായ ആഹാരമാണെങ്കിലും പകംചെയ്യത്തോ അല്ലത്തതോ (പക്വമോ അപക്വമോ) ആയ ആഹാരമാണെങ്കിലും അത് ദോഷമില്ലാത്തരീതിയിൽ ദഹിപ്പിക്കപ്പെടുന്നു.

तृतीयश्लोकः- समदोषः....इत्यभिदीयते ।।

ത്രിദോഷങ്ങൾക്ക് സമത്വവും, ജഢരാഗ്നിക്ക്

ഏറ്റകുറച്ചിലുകളില്ലാതെ സമാവസ്ഥയും, സപ്തധാതുക്കൾക്ക് തുല്യതയും, മലമൂത്രാദിക്രിയകൾക്ക് കൃത്യതയും തെളിഞ്ഞ മനസ്സും ഇന്ദ്രിയങ്ങളും, സ്വയം പ്രസന്നതയും ഉള്ളവൻ ആരോ അവൻ സ്വസ്ഥൻ എന്ന് അറിയപ്പെടുന്നു.

**ത്രിദോഷം** - വാത-പിത്ത-കഫം.

**സപ്തധാതു-** രസം, രക്തം, മാംസം, മേദസ്സ്, അസ്ഥി, മജ്ജ, രേതസ്സ്

**മലം** - ശരീരത്തിലുണ്ടായി പുറത്തേക്ക് പോകുന്ന അഴുക്കുകൾ

ശരീരദൂഷണാത് ദോഷഃ മലിനീകരണാത് മലഃ

ധാരണാത് ധാതവസ്തേ സ്യുർ വാതപിത്തകഫാസ്ത്രയഃ

വാതപിത്തകഫങ്ങൾ ശരീരത്തെ ദുഷിപ്പിക്കുന്നതിനാൽ ദോഷമെന്നും ശരീരത്തെ ധരിക്കുന്നതിനാൽ ധാതുവെന്നും മലിനമാക്കുന്നതിനാൽ മലമെന്നും അവസ്ഥാഭേദമനുസരിച്ച് വെവ്വേറെ പേരുകളിൽ അറിയപ്പെടുന്നു.

**चतुर्थश्लोकः- आहारः....विवर्धनः ।।**

ആഹാരം പ്രീണനവും (തൃപ്തിയെ പ്രദാനം ചെയ്യുന്നതും) പെട്ടെന്ന് ശരീരത്തെ ബലപ്പെടുത്തുന്നതും ദേഹത്തെ നിലനിർത്തുന്നതും ആയുസ്സ്, തേജസ്, ഉത്സാഹം, ഓർമ്മ, ഓജസ്സ്(കാന്തി), ദഹനശക്തി എന്നിവയെ വർദ്ധിപ്പിക്കുന്നതാകുന്നു.

पाठः ४

# क्षुधा ज्ञानप्रदायिनी

| | | |
|---|---|---|
| **आशयः** | : | भक्षणम्/आरोग्यम्। |
| **उपाशयम्** | : | बुभुक्षा/दुर्भिक्षम्। |
| **व्यवहाररूपम्** | : | चम्पूः। |
| **उद्देश्यानि/लक्ष्याणि** | : | भक्ष्यवस्तूनां संरक्षणविषये विज्ञानम्। |
| | | चम्पूकाव्यविभागमधिकृत्य प्रत्यभिज्ञानम् |
| **मूल्यम्/मनोभावः** | : | आत्मनः विभवान् अन्येभ्यो विभज्य प्रददाति। |
| | | मितया हितया च रीत्या उपयोगः करणीयः। |
| **पठनलक्ष्याणि** | : | चम्पूकाव्यं भावलयानुसारम् अवतारयति। |
| | : | विशेषणविशेष्याणि विविच्य पट्टिकां लिखति। वाक्येषु यथासन्दर्भं प्रयुङ्क्ते च। |
| | : | चम्पूकाव्यं सम्भाषणरूपेण लिखति। |
| | : | सम्बोधनरूपाणि चित्वा लिखति। |
| | : | समानार्थकपदं लिखति। |
| **पठनक्षमता** | : | चम्पूकाव्यम् उचितया रीत्या अवतारयति। |
| | : | विशेषणविशेष्याणां प्रयोगं जानाति। |
| | : | प्रकृतिविभवानां मितोपयोगः करणीयः इति जानाति। |
| **कालांशा** | : | १० |

**पाठस्य आमुखम्** गद्यपद्यमिश्रितं विशिष्टं कञ्चन काव्यस्वरूपं चम्पूकाव्यम् इति व्यवह्रियते। आचार्यदण्डी स्वकीये काव्यादर्शे **गद्यपद्यमयं काचित् चम्पूरित्यभिधीयते** (१-३१) इत्यस्य लक्षणं ददाति। यद्यपि कादम्बरीहर्षचरितादिषु गद्यकाव्येष्वपि तथा रूपकेष्वपि यत्र कुत्रचित् पद्यानि दृश्यन्ते तथापि तानि चम्पूकाव्यानि न भवन्ति। गद्यपद्यमयम् अन्यत् काव्यरूपं राजप्रशस्तिः "बिरुदं" भवति। **गद्यपद्यमयी राजस्तुतिर्बिरुदमुच्यते - इति साहित्यदर्पणः**-6-337। किन्तु चम्पूकाव्ये सामान्यकथनं गद्येनैव कथ्यते विशेषकथनाय पद्यं चाश्रियते इति विशेषः।

गद्यानुबन्धरसमिश्रितपद्यसूक्ति-
हृद्या हि वाद्यकलया कलितेव गीतिः। इति

चम्पूरामायणे भोजदेवः चम्पूकाव्यस्य हृद्यतां दृष्टान्तेन सूचयति।

**प्रवेशकप्रवर्तनम्** हितस्य आहारस्य अभावेन किं वा भविष्यति? सर्वेषां समीकृतमाहारं यावत् शक्यं लभ्यते वा? बुभुक्षितानां कृते किं वा करणीयम्? इत्यादिभिः प्रश्नैः छात्रेषु बुभुक्षामधिकृत्य चिन्ताम् उत्पादयति। बुभुक्षितानां जनानां विविधानि चित्राणि च प्रदर्शयति। चर्चां क्रोडीकरोति।

**पाठापग्रथनम्** पूर्वस्मिन् पाठे हिताहारस्य मिताहारस्य पथ्यस्य च प्राधान्यमधिकृत्य ज्ञातवन्तः खलु। अस्मिन् पाठे आहाराभावेन पीडितस्य जनस्य पारवश्यमधिकृत्य विरचिताम् एकां चम्पूं परिचिनुमः। काचित् महिला क्षुधापीडितम् पुत्रं गृहीत्वा कस्यचन धनिकस्य गृहमागच्छत्। तस्याः दीनां वाचं श्रुत्वा गृहनायिका पुत्री च बहिरागत्य सपुत्रां तां गृहान्तरालम् आनयति। स्वपुत्रमिव लालयति च। एतत् कथासन्दर्भः चम्पूरूपेण इदानीं पठामः।

**पठनप्रवर्तनम्**

**प्रवर्तनम् 1** **पाठभागं सम्यक् पठित्वा भावलयानुसारं चम्पूप्रभाषणं करोतु।**

**पठनलक्ष्यम्** चम्पूकाव्यविभागं परिचिनोति।

कैरल्यां कथाप्रसङ्गमिति किञ्चन कलारूपमस्ति। तत्र भावलयानुसारं गद्यं पद्यं च मिश्रीकृत्य कलाकारः सहृदयानां पुरतः कथाम् अवतारयति। तादृशरीत्या इमां पाठभागस्थितां चम्पूम् अवताराणार्थं निर्दिशितु। एकैकस्यापि कथापात्रस्य स्वभाववैशिष्टमधिकृत्य उचितभावमपि स्वीकर्तुं निर्दिशतु। यत्र गद्यवाचने पद्यालपने क्लिष्टतामनुभवति तत्र आदर्शवाचनेन साहाय्यं च करोतु।

**मूल्यनिर्णयसूचकानि**

आशयावबोधः, उचितभावः, भाषाशुद्धिः, चम्पूशैली।

**प्रवर्तनम् -2** **पाठभागात् विशेषणविशेष्याणि विविच्य लिखतु।**

**पठनलक्ष्यम्** विशेषणं विशेष्यं च प्रत्यभिजानाति।

अध्यापिका विशेषणं विशेष्यम् इत्येतयोः प्राधान्यमधिकृत्य परिचाययति। यथा-

<u>विशेषणम् - विशेष्यम्।</u>

यत् पदम् अपरस्य पदस्य वैशिष्ट्यं बोधयति तत्पदं विशेषणम्। यस्य वैशिष्ट्यं बोधयति तत्पदं विशेष्यम्। यथा- "क्रूरः मृगः" इति वाक्ये मृगशब्दस्य विशेषता क्रूरः इति विशेषपदेन बोधयति। अतः क्रूरः इति पदं विशेषणम्। मृगस्य विशेषमेव अनेन विशेषणेन द्योतयति। अतः मृगः विशेष्यम्। अत्र विशेष्यस्य लिङ्गम्, वचनम् विभक्तिश्च यादृशी भवन्ति तादृशी एव भवन्ति विशेषणस्यापि। अतः उच्यते -

यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य।
तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि।।

कारिकामिमां बोधयित्वा पाठभागात् विशेषणविशेष्याणि विविच्य लेखनाय निर्दिशति। यथा-

| **विशेषणम्** | - | **विशेष्यम्** |
|---|---|---|
| विशालस्य | - | भवनस्य |
| विगलितकेशपाशा, कृशाङ्गी, परिम्लानमुखी | - | महिला |
| रुदन्तम् | - | स्वपुत्रकम् |
| आगता | - | युवती |
| ऊनषोडशवर्षीया | - | बाला |

**मूल्यनिर्णयसूचकानि**

लिङ्गविभक्तिवचनानामवबोधः,विशेषणविशेष्यज्ञानम्,उचितपदचयनम्।

**प्रवर्तनम् -3** **गृहनायिकया युवतीं प्रति कृतं सम्भाषणं सम्भाव्य लिखतु।**

**पठनलक्ष्यम्** प्रश्नवाचकशब्दानाम् उपचारशब्दानां च प्रयोगप्रत्यभिज्ञानम्।

आचारोपचारद्योतकानि पदानि, तथा प्रश्नवाचशब्दान् च यथातथम् उपयुज्य सम्भाषणं कर्तुं छात्राः समर्थाः भवितव्याः। तदर्थम् आदर्शरूपेण सम्भाषणं परिकल्प्य लेखनाय निर्दिशतु। अत्र पाठभागे गृहमागतां सपुत्रां युवतीं स्वीकृत्य गृहनायिका किमवदत् ?, आगता किं प्रतिवदति? इति सम्भाव्य लेखनाय निर्दिशतु।

**मूल्यनिर्णयसूचकानि**

प्रश्नवाचकशब्दानामुपयोगः, उपचारशब्दानां प्रयोगः,सम्भाषणशैली।

**प्रवर्तनम् -4** **पाठस्थानां पदानां सम्बोधनरूपाणि चित्वा लिखतु।**

**पठनलक्ष्यम्** सम्बोधनरूपाणां प्रत्यभिज्ञानम्।

पाठभागे आद्यावसानम् अनेकानि सम्बोधनरूपाणि सन्ति।

तानि चित्वा टिप्पणी पुस्तके लेखनाय निर्दिशतु। सम्बोधनरूपस्य प्रथमाविभक्तिरूपमपि लेखितुं शक्यते चेत् तदपि करणीयम्। यथा - जननि -जननी, जाते -जाता, जन-जनः।

**मूल्यनुर्णयसूचके**

सम्बोधनपदावबोधः, चयनौचित्यम्।

**प्रवर्तनम् -5** **कोष्ठकात् समानार्थकपदं चित्वा पूरयतु।**

**पठनलक्ष्यम्** पर्यायपदानि अधिकृत्य ज्ञानम्।

पाठभागे अनेकानि पदानि समानार्थकानि भवन्ति। तानि यथायोग्यं योजयित्वा टिप्पणीपुस्तके लेखनाय निर्दिशति। उचितसाहाय्यमपि ददाति।

**मूल्यनिर्णयसूचके**

आशयावबोधः, उचितपदचयनम् ।

**प्रवर्तनम् -6** **कथापूरणम्**

**पठनलक्ष्यम्** सन्दर्भानुसारं कथापूरणसामर्थ्यं सम्पादयति।

पाठस्यान्ते गृहनायिका युवतीं स्वीकृत्य क्षुधार्ताय शिशवे क्षीरं ददाति इति अवगतम्। अनन्तरं किमभवत् ? इति अध्यापिका पृच्छति। कथाशेषं छात्राः स्वभावनानुसारं यावच्छक्यं लिखन्ति अथवा वदन्ति।

**मूल्यनिर्णयसूचकानि**

औचित्यम्, भाषाशुद्धिः, कथापूर्णता।

**अग्रिमपाठसंयोजकं-प्रवर्तनम्** बुभुक्षया पीडितः यल्लभ्यं तत् हितं वा अहितं वा इति चिन्तां विना भुनक्ति। तदपि आरोग्यनाशाय भवति। अतः सुलभो वा दुर्लभो वा आहारः हितकर एव भोजनीयः इति विषये चर्चां नयति क्रोडीकरोति च।

**ऐसिटी साध्यता**

1) केविन् कार्ट्टर् इति विश्वप्रसिद्धस्य चित्रकारस्य **सुडानि बालिका** इति प्रसिद्धस्य चित्रस्य प्रदर्शनम्।

2) चम्पूप्रभाषणस्य ओडियो अथवा वीडियो निर्माणं प्रदर्शनं च।

**अनुबन्धः 1** **पाठस्थानां श्लोकानां गद्यक्रमः भावार्थश्च।**

क्षुधा ........ वेदविदात्मदक्षः।।

**अन्वयः** - क्षुधा परक्लेशविवेकजन्या (भवति)। यः तीव्रतरां बुभुक्षां जानाति, आत्मानम् इव तम् अपरं पश्यन् स एव महान् वेदविद् आत्मदक्षः च (भवति)।

**भावार्थः** - बुभुक्षा अपरस्य जनस्य क्लेशम् अधिकृत्य विवेकं जनयति। यो जनः अतिकठिनां बुभुक्षां स्वानुभवेन जानाति, आत्मानम् इव बुभुक्षितम् अपरमपि जनं द्रष्टुमुत्सुकः स एव महान् भवति। यत् ज्ञातव्यं तत् स एव जानाति। स तु स्वयमेव जीवितसन्तरणाय समर्थो भवति। (श्लोकोऽयम् अन्यस्माद् ग्रन्थात् नोद्धृतो भवति)

**पद्यम् १ पश्यन्तु .... च काचित्।।**

**अन्वयः** - भो सहृदयाः, पुरतः लसत् सुशान्तम् अतिनिर्मलम् उत्तमार्हं तत् गेहं पश्यन्तु। तत्र काचित् तरुणी प्ररुदन्तम् आत्मजातं च निधाय सहसा अङ्गणं प्रविशति।

**भावार्थः** - भो समानमनस्काः, भवतां पुरतःविराजमानम् अतीवशान्तम् नैर्मल्ययुक्तं हर्म्योपमं भवनं पश्यन्तु। तत्र काचित् युवतिः सदैन्यं विलपन्तं स्वपुत्रं धृत्वा तद्भवनाङ्गणं तरसा प्रविशति।

**पद्यम् २ मातर्यच्छतु .......... भोजनम्।।**

**अन्वयः** - (भो) मातः, मे भोज्यं यच्छतु। पुत्रकः क्षुधा रोदिति। तस्य बुभुक्षा (मया) संहर्तुम् अशक्या (भवति)। (अतः) भोजनं देहि।

**भावार्थः** - हे जननि, मह्यं किञ्चिद् भोजनं ददातु। मम पुत्रोयं क्षुधया विलपति। तस्य बुभुक्षा असहनीया भवति। अतः तत्परिहरणाय

किञ्चिदन्नं प्रयच्छतु।

**पद्यम् -३ वामहस्ते ...... बहिर्द्वारेऽप्यतिष्ठद्बाला।।**

**अन्वयः** - वामहस्ते दुग्धचषकं दक्षिणे हस्ते पक्वमोचाफलम् अपि धृत्वा बाला - " का आगता? ", " सा किमर्थं विलपति? " - इति ज्ञातुम् अत्र बहिर्द्वारे क्षिप्रकुतुकेन अतिष्ठत्।

**भावार्थः** - वामहस्ते क्षीरसंयुतं पानपात्रं तथा दक्षिणहस्ते पक्वं कदलीफलं च धृत्वा काचित् बालिका - गृहाङ्गणम् आगता युवती का, सा किमर्थं विलपति - इति ज्ञातुं प्रकोष्ठस्य कवाटे सकौतुकम् अतिष्ठत्।

**पद्यम् -४ मातृवात्सल्यपीयूष........... क्षणादप्यानयद्गृहम् ।।**

**अन्वयः** - कृपामयी (सा माता) सपुत्रां युवतीं मातृवात्सल्यपीयूषवर्षणेन सिक्त्वा क्षणादपि गृहम् आनयत्।

**भावार्थः** - सा स्नेहमयी माता तु मातृवात्सल्यरूपेण अमृतवर्षणेन पुत्रसहितां तां युवतीं प्रथममेव अभिषिच्य विलम्बं विना स्वगृहम् आनिनाय।

**पद्यम् -५ मा मा जलेन जननि! ........रसदां सुवाणीम्।**

**अन्वयः** - भो जननि, जलेन मा मा । अधुना मदीयं चषकस्थितं क्षीरं शीघ्रं प्रददातु। तत् पीत्वा विरला अपि अनुजस्य जिह्वा पूर्वा (जिह्वा) इव सदा रसदां सुवाणीं जवेन वर्षतु।

**भावार्थः** - हे मातः, अनेन केवलेन जलेन अलम्। इदानीं चषकस्थितं क्षीरं तस्मै विलम्बं विना प्रयच्छतु। क्षीरमेतत् पीत्वा मदीयोयमनुजः जिह्वायाः जाड्यं विहाय पूर्वं यथा तद्वत् सरसां वाणीं मुहुर्मुहुः वर्षतु।

**अनुबन्धः 2** अन्नदानस्य महत्त्वम्, बुभुक्षापीडितस्य स्वभावः, अन्नस्य दुरुपयोगः, अन्नप्राप्त्यर्थम् अनुभूताः क्लेशाः इत्यादिषु विषयेषु पूर्वैः कविभिः कथितानि कानिचन पद्यानि अधिकवाचनाय चर्चाचालनाय च अत्र दीयते। द्वित्राण्युपयुज्य चर्चां चालयतु।

ഉണ്ണാൻ വെച്ചതു ശൂന്യമായൊരിലയാണൂണങ്ങു തീരുമ്പൊഴും
വേണം ശൂന്യമിലയ്ക്കകം കളയൊലാതിന്നേണ്ടതൊന്നും വൃഥാ
വേണം ശ്രദ്ധ വിളമ്പുമോർക്കുമതുപോൽഉണ്ണുന്നവർക്കും,വിശ-
പ്പാറ്റാനുള്ളവയെച്ചിലിൽ കളയുകിൽദാരിദ്ര്യമല്ലോ ഫലം

- കുറ്റിക്കോൽ ശങ്കരൻ എമ്പ്രാന്തിരി

എല്ലാ ജീവികുലത്തിനും വയറിലെത്തീയാണു മുഖ്യം, വിശ-
പ്പല്ലാതില്ല കലമ്പിടാനുമടരിൽ കൊല്ലാനുമായ് കാരണം
വല്ലാത്താർത്തി വിവേകശാലി നരനെപ്പോലും മൂഗീയാഖ്യമാം
പൊല്ലാപ്പിങ്കലകപ്പെടുത്തി സതതം വീഴ്ത്തുന്നു ദുഃഖങ്ങളിൽ

- ഹരിപ്രസാദ് കടമ്പൂര്

ഏതൊന്നറിഞ്ഞാൽ മറ്റെല്ലാമറിയാ,മാ-
വേദം വിശപ്പെന്നറിഞ്ഞുകൊണ്ടാൽ
പൈക്കുന്ന പള്ളയ്ക്കിരതേടി വാടുന്ന
പാവത്തിൽ കാണാം പടച്ചവനെ - യൂസഫലി കേച്ചേരി

उदरनिमित्तं बहुकृतवेषः - शङ्कराचार्यः

भगिनीं जननीं पुत्रं भार्यां दुहितरं तथा।
भ्रातरं स्वजनं वापि क्षुधाविष्टो न विन्दति।। - वह्निपुराणे ।

गजतुरगसहस्रं गोकुलं कोटिदानम्
कनकरजतपात्रं मेदिनीं सागरान्ताम्।
उभयकुलविशुद्धं कोटिकन्याप्रदानं
न हि न हि बहुदानम् अन्नदानात्समानम्।। सुभाषितरत्नभण्डाकारम्

अनुबन्धः 3 **कोशपरिचयः।**

प्रकोष्ठः - गृहद्वारः ।प्रकोष्ठस्तु गृहद्वारः।

अर्भकः - शिशुः। पोतःपाकोऽर्भकोडिम्बः पृथुकःशावकःशिशुः

जिह्वा - रसना। रसज्ञा रसना जिह्वा

नीरम् - जलम्। तोयपानीयनीरक्षीराम्बुशम्बरम्।

तरुणी - युवतिः।तरुणी युवतिः समे।

भवनम्- गृहम्। सदनं भवनागारं मन्दिरं निलयं गृहम्।

पाठः ५

# हितमेवाऽश्नुयात् सदा।

| | | |
|---|---|---|
| **आशयः** | : | भक्षणम्/ आरोग्यम् |
| **उपाशयः** | : | भक्षणवैविध्यम्। |
| **व्यवहाररूपम्** | : | सम्भाषणम्। |
| **उद्देश्यानि/लक्ष्याणि** | : | उचितभक्षणशैलीनां प्रत्यभिज्ञानम्।<br>संस्कृतभाषामाध्यमेन नूतनसाङ्केतिकविद्यायाः उपयोगः। |
| **मूल्यम्/मनोभावः** | : | समीकृताहारवस्तूनामुपयोगमधिकृत्य प्रत्यभिज्ञानम् । |
| **पठनलक्ष्याणि** | : | 'अमितभक्षणं हानिकरम्' इति विषयमधिकृत्य भित्तिपत्रम् निर्माति । |
| | : | जीवितशैलीरोगान् अधिकृत्य टिप्पणीं लिखति। |
| | : | भक्षणवैविध्यं गुणं च ज्ञात्वा लघूपन्यासं लिखति। |
| | : | 'आस्वाद्यकरं भोज्यम्' इति नाम्ना भोजनप्रदर्शनम् आहारपदार्थानां पट्टिकाकारणं च। |
| | : | सन्दर्भानुसारं सम्भाषणं लिखति अवतारयति। |
| | : | पाठभागं नाटकरूपेण अवतारयति। |
| | : | अव्ययानां पट्टिकाकरणं वाक्यनिर्माणं च। |
| **पठनक्षमता** | : | सम्भाषणरीतिं सन्देशलेखनञ्च परिचिनोति। |
| **कालांशः** | : | 12 |

**पाठस्य आमुखम्** जीवने हिताहारस्य प्रसक्तिः अतुल्या एव । यतः जीविनां जीवनरक्षणे अत्यन्तापेक्षितो भवति आहारः। हितस्य मितस्य आहारस्य अभावेन अनेके जनाः पीडाम् अनुभवन्ति । हिताहारस्य अनुशीलनेन सम्पूर्णा संतुष्टिः लभ्यते। इदानींतनकाले जीवनशैलीरोगाः बाहुल्येन सर्वत्र दृश्यन्ते। अनुचितम् आरोग्यशीलमेव अस्य मुख्यं कारणम्। अतः हिताहारः स्वयं परिशीलनीयम्।

**प्रवेशकप्रवर्तनम्** सम्भाषणम् इति व्यवहाररूपेण विरचितेऽस्मिन् पाठभागे मातुलभागिनेयाभ्यां सामूहिकमाध्यमद्वारा कृतम् आहारसम्बन्धिसम्भाषणम् अस्ति। मातुलेन भोजनं क्रेतुं प्रेषितः भागिनेयः भोजनापणे स्थित्वा तत्रस्थं भोजनवैविध्यं दृष्ट्वा किं भोज्यं क्रेतव्यमिति शङ्काविष्टः तिष्ठति। सः मातुलं प्रति वाट्सपद्वारा सन्देशं प्रेषयति।

**पाठापग्रथनम्** संप्रति सर्वत्र छात्राः आधुनिक वार्तामाध्यमान् उपयोक्तुं समर्थाः भवन्ति। ते मित्राणाम् इतरेषाञ्च कृते बहुप्रकारैः सन्देशान् प्रेषयन्ति च। अस्य पाठस्य प्रतिपाद्यस्तु एतादृशः कश्चित् सन्देशः अस्ति। एवं संस्कृतभाषया सम्भाषणरूपेण सन्देशान् लेखितुं प्रेषयितुं च समर्थाः भवन्ति। प्रश्नवाचकशब्दान् च यावच्छक्यं स्वीकुर्वन्ति।

**पठनप्रवर्तनम्**

**प्रवर्तनम् -1** **“अमिताहारः आरोग्यस्य हानिकरः” इति विषयमधिकृत्य भित्तिपत्रं रचयतु।**

**पठनलक्ष्यम्** संकूतभाषया भित्तिपत्रिकारचन साथ्र्यम् आर्जयति।

अध्यापकः भित्तिपत्रमातृकां प्रदर्शयति। तदनुसारं भित्तिपत्रिकाणां रचनायै प्रेरयति। भित्तिपत्रिकायां संयोजनाय

अनुयोज्यानि वाक्यानि अध्यापकः श्यामफलके लिखति।

यथा- अमिताहारम् आरोग्याय न युज्यते।

हितः मितः च आहारः जीविते अनुशीलनीयः।

अमिताहारं वर्जय। जीविते आरोग्यवान् भव।......

**मूल्यनिर्णयसूचकानि**

अकर्षणीयता, औचित्यम्, भोज्यवस्तूनाम् अभिधाज्ञानम्।

मातृका







**प्रवर्तनम् -2** **वैद्येन सह अभिमुखं कृत्वा जीवितशैलीरोगमधिकृत्य लघुटिप्पणीं लिखति।**

**पठनलक्ष्यम्** अभिमुखभाषणरीतिं प्रत्यभिजानाति।

विषयानुसारं टिप्पणीलेखनसामर्थ्यं सम्पादयति।

वैद्येने सह अभिमुखभाषणाय छात्राणाम् अवसरः साक्षात् वा नूतनसाङ्केतिकविद्याद्वारा वा दातव्यः। अभिमुखभाषणाय प्रश्ननिर्माणाय छात्रान् निर्दिशति। तेभ्यः प्रश्नेभ्यः उचितान् प्रश्नान् क्रोडीकृत्य अभिमुखाय सज्जीकरोति। एवम् अभिमुखं संञ्चाल्य तम् आशयं स्वीकृत्य लघुटिप्पणीलेखनाय निर्दिशति। उचितानि साहाय्यानि यथावसरं दातव्यानि।

**मूल्यनिर्णयसूचकानि**

उचितप्रश्नवाचकानामुपयोगः, औचित्यम्, घटना, आशयस्पष्ठता, क्रोडीकरणसामर्थ्यम्।

**टिप्पणी मातृका**

अधुना देशे सर्वत्र आबालवृद्धं जनः विविधैः रोगैः बहून् क्लेशान् अनुभवति। रक्तातिसम्मर्दः, प्रमेहः, दुर्मेदः, हृद्रोगः इत्यादयः सर्वत्र दृश्यन्ते। व्यायामस्य अभावः, आहारस्य अमितोपयोगः, निराहारः, निद्राभावः, मानसिकसम्मर्दादयः एतेषां रोगाणां कारणानि भवन्ति। मानवस्य जीवितशैलीः एव एतेषां रोगाणां हेतुः इत्यनेन सामान्येन एते रोगाः जीवितशैलीरोगाः इति कथ्यन्ते। समयानुबन्धिन्या हितया मितया च जीवितचर्यया एतेभ्यः रोगेभ्यः औषधं विनापि मुक्तिं प्राप्तुं शक्यते।

**प्रवर्तनम् -3** **आहारपदार्थानां गुणान् अधिकृत्य लघुटिप्पणीं लिखतु।**

**पठनलक्ष्यम्** विषयानुसारं टिप्पणीलेखनसामर्थ्यं सम्पद्यति।

अध्यापिका पाठभागस्थं भोज्यवैविध्यं आधारीकृत्य टिप्पणीपुस्त्के लघुटिप्पणीलेखनाय निर्दिशति । उचितसाहाय्यमपि ददाति।

**मूल्यनिर्णयसूचकानि**

आशयावबोधः, वाक्यघटना, औचित्यम्।

**मातृका -** आहारपदार्थानाम् उपयोगेन औषधं विना अपि केषाञ्चन रोगाणां दूरीकरणाय शक्यते। विविधानां धान्यानां भोजनेन प्रमेहस्य शान्तिः भवति। मत्स्यानाम् सेवनेन जीवकानां लाभः जायेत। शाकानि रक्तवर्धकानि भवन्ति। विविधानां सस्यानां पत्रं पुष्पं काण्डं फलं मूलं च भोज्ययोग्यानि तथा आरोग्यवर्धकानि भवन्ति।

**प्रवर्तनम् -4** **सम्भाषणांशान् रचयतु।**

**पठनलक्ष्यम्** विषयानुसारं सम्भाषणलेखनचातुरीवर्धनम्।

अध्यापिका छात्रान् वृत्ताकारे चलितुं निर्दिशति। चलनसमये एकं फलस्य नाम वदति। पदे कति अक्षराणि सन्ति तत् संख्यायुक्ताः गणरूपेण तिष्ठन्ति। (उदा- दाडिमम् इति चेत् त्रयः मिलित्वा तिष्ठन्ति)। पुनः वृत्ताकारे तिष्ठति एवं क्रीडामनुवर्तते। अन्ते द्व्यक्षरपदं (उदा- आम्रम्) वक्तव्यम् ।तदा द्वौ छात्रौ मिलित्वा तिष्ठतः। तौ गणरूपेण उपवेशनाय निर्दिशति। ततः अध्यापिका छात्रान् क्रेता विक्रेता/ वैद्यः रोगी इति द्वौ विषयौ श्यामफलके लिखति । एकैकं गणम् एताभ्यां विषयाभ्यां एकं विषयं स्वीकृत्य सम्भाषणं टिप्पणीपुस्तके लेखनाय निर्दिशति। अनन्तरं गणानुसारम् अवतरणाय अवसरः दातव्यः। यथावसरं साहाय्यमपि करणीयम्।

**मूल्यनिर्णयसूचकानि**

सम्भाषणशैली, औचित्यम्, उचितप्रश्नवाचकानाम् उपयोगः

**क्रेतुः विक्रेतुश्च मिथःसम्भाषणम्। मातृका -**

| | | |
|---|---|---|
| विक्रेता | - | किमावश्यकम् ? |
| क्रेता | - | गोधूमः । |
| विक्रेता | - | कियत्परिमितम् आपेक्षितम् ? |
| क्रेता | - | पञ्च किलोपरिमितम्। कियन्मूल्यं? |
| विक्रेता | - | एककिलोपरिमितस्य चत्वारिंशत् रूप्यकाणि। |
| विक्रेता | - | इतोऽपि किमपि आवश्यकं वा? |
| क्रेता | - | न। अनेन अलम् । |
| विक्रेता | - | तथास्तु। पुनरपि आगच्छतु। |

**वैद्यस्य रोगिणः च मिथः सम्भाषणम्। मातृका-**

वैद्यः - आगच्छतु ।उपविशतु। किमभवत् ?

रोगी - अहं शिरोवेदनया बहु क्लेशम् अनुभवामि।

वैद्यः - तथा वा ? कदा वेदना आरब्धा ?

रोगी - दिनत्रयात् पूर्वम्।

वैद्यः - निद्रा सम्यग् अस्ति वा?

रोगी - नास्ति। शिरोवेदनया एव निद्रा नासीत्।

वैद्यः - अस्तु। अहम् औषधं ददामि। दिनत्रयं लेपनमिदं ललाटे लेपयतु। परिपूर्णविश्रमं च करोतु ।

रोगी - तथास्तु।

**प्रवर्तनम् -5** **पाठभागं पठित्वा नाटकरूपेण परिवर्त्य लिखतु। चित्रीकरोतु।**

**पठनलक्ष्ये** नाटकावतरणाय पटकथां लिखति।

अभिनयचातुर्यं वर्धयति।

अध्यापिका छात्रान् त्रीन् गणान् निर्मीय उपवेशयति। ततः पाठभागस्थं सम्भाषणम् अन्येषां कथापात्राणां च योजनेन विपुलीकृत्य कस्यचन नाटकस्य मातृकायां परिवर्त्य विलिख्य अवतरणाय सङ्घान् निर्दिशति । अवतारणसमये चित्रीकरणमपि करणीयम्। यथावसरं साहाय्यमपि दातव्यम्।

**मूल्यनिर्णयसूचकानि**

नाटकीयता, सम्भाषणघटना, औचित्यम्

**प्रवर्तनम् -6** **पाठभागस्थानां कृत्वान्त-ल्यवन्त-तुमन्नन्तानामव्यनां चयनं , तान्युपयुज्य वाक्येषु प्रयोगश्च।**

**पठनलक्ष्यम्** अव्ययानां प्रत्यभिज्ञानम्।

पूर्वस्मात् पाठाद् इव कृत्वान्त- ल्यवन्त - तुमन्नन्तानि अव्ययानि चित्वा प्रथमं पट्टिकां करोतु। तदनु तेषु एकैकं चित्वा यावच्छक्यं वाक्यानि रचयितुं छात्रान् प्रेरयति।

यथा- क्रीत्वा - पिता आपणात् पुस्तकं क्रीत्वा आगाच्छति।

केतुम् - जोसफः कन्दुकं केतुम् आपणं गच्छति।

**मूल्यनिर्णयसूचके**

चयनसामर्थ्यम्, वाक्यरचनासामर्थ्यम्।

**प्रवर्तनम् -7** **आस्वाद्यकरं भोज्यम् आरोग्यकरं भोज्यम् - इति शीर्षके एकं भोजनप्रदर्शनम् आयोजयति।**

**पठनलक्ष्यम्** भोज्यवस्तूनि खाद्यं, पेयं, लेह्यम् इति विवच्य जानाति।

आस्वाद्यकरं भोज्यम् आरोग्यकरं भोज्यम् इति शीर्षके भित्तिपत्रं विलिख्य प्रदर्शयति। तस्मिन् कार्यक्रमे आरोग्यकरं भोज्यमधिकृत्य लघुभाषणेन उद्घाटनं करोति। प्रदर्शनार्थम् एकैकः छात्रः भोज्यवस्तूनि आनयति। तेषां नामानि संस्कृते प्रादेशिकभाषायां च विलिख्य प्रदर्शयति। तानि खाद्यं, पेयं, लेह्यम् इति रूपेण पट्टिकां करोति।

**मूल्यनिर्णयसूचकानि**

वर्गीकरणम्, उचितक्रमीकरणम्, भागभागित्वम् ।

**प्रवर्तनम् -8** **तव्यत् - यत् अनीयर् प्रत्ययान्तानि पदानि पाठभागात् चित्वा लिखति।**

**पठनलक्ष्यम्** तव्यत् यत् प्रत्ययानां प्रत्यभिज्ञानम्।

पाठभागे स्थितानि तव्यत् -यत् प्रत्ययुक्तानि पदानि चित्वा

पट्टिका करणाय निर्दिशति।

यथा- भोक्तुं योग्यं - भोज्यम्। (यत्)

खादितुं योग्यम् - खाद्यम् (यत्) खादनीयम् (अनीयर्)

पातुं योग्यं -पेयम्

लेढुं योग्यम् - लेह्यम्

क्रेतुं योग्यं - क्रेतव्यम् (तव्यत्)

**मूल्यनिर्णयसूचके**

**चयनसामर्थ्यम्, वर्गीकरणम्।**

**കുറിപ്പ്-** ശക്യത, അർഹത ആവശ്യകത, വിധി എന്നീ അർത്ഥങ്ങൾ കാണിക്കാൻ തവ്യത് അനീയര്, യത് എന്നീ പ്രത്യയങ്ങൾ ചേർക്കുന്നു. ഇവയിലെ അന്ത്യവർണ്ണങ്ങൾ ഇത്തുകളാണ്. ശേഷിക്കുന്ന തവ്യ, അനീയ, യ എന്നിവയാണ് യഥാർത്ഥപ്രത്യയഭാഗങ്ങൾ ഉദാഹരണം- ജി- ജേതവ്യം(ജയിക്കപ്പെടേണ്ടത്) ശ്രു- ശ്രോതവ്യം(കേൾക്കേണ്ടത്), കൃ- കർത്തവ്യം (ചെയ്യേണ്ടത്), സ്മൃ- സ്മർത്തവ്യം (സ്മരിക്കപ്പെടേണ്ടത്) എന്നിങ്ങനെ തവ്യ പ്രത്യയം ചേർന്നരൂപങ്ങൾ. ശ്രവണീയം കരണീയം, സ്മരണീയം എന്നിങ്ങനെ അനീയപ്രത്യയം ചേർന്നും ശ്രവ്യം, കാര്യം, സ്മര്യം എന്നിങ്ങനെ യത് പ്രത്യം ചേർന്നും ഇതേ അർത്ഥങ്ങളിൽ രൂപങ്ങൾ വരുന്നു. ഇവ വിശേഷണങ്ങളാകയാൽ ലിംഗ, വചന, വിഭക്തിപൊരുത്തം വേണം. (അവലംബം- പ്രക്രിയാഭാഷ്യം- പേജ് 459-461)

**अग्रिमपाठसंयोजकं - प्रवर्तनम्** अधुनातनकाले वाट्सप्, एफ् बि, टेलग्रां, एक्स्, ई - मेल्, इत्यादिभिः विविधैः सामूहिकमाध्यमैः सन्देशाः प्रेष्यन्ते। संस्कृतभाषामुपयुज्य च सन्देशं प्रषयितुं यतताम्। क्षणेनैव कालेन

सन्देशान् अन्यत्र नेतुं कथं शक्यते ? बहूनां कृत्रिमोपग्रहाणां साहाय्येन एव इदं साध्यं भवति। एतादृशेषु उपग्रहेषु भारतस्य प्रथमः उपग्रहः कः इति चर्चां नयति। क्रोडीकरोति।

# एककम् ३
# कुड्मलम्

## आमुखम्

नवपल्लवैः तदनु पत्रैः च सम्पन्ने संस्कृतपादपे अनन्तरं कुड्मलं जायते। संस्कृत भाषासाहित्यञ्च कुड्मलनामके अस्मिन्नेकके मुख्यविषयत्वेन प्रतिपादितम्। विवरणात्मके **मयूरशिखा** नामके षष्ठे पाठे आर्यभटस्य योगदानमधिकृत्य लघुविवरणम् , **नियम्यतां स्वयं** नाम काव्यपाठे अश्वघोषस्य सौन्दरनन्दात् उद्धृतानि कानिचन पद्यानि तथा अष्ठमे पाठे **गच्छमो वयम्** इति यात्राविवरणञ्च सन्ति।

# पाठः ६ मयूरशिखा

| | | |
|---|---|---|
| **आशयः** | : | भाषासाहित्यम्। |
| **उपाशयः** | : | वैज्ञानिकशास्त्रम् / गणितशास्त्रम्। |
| **व्यवहाररूपम्** | : | उपन्यासः। |
| **उद्देश्यानि/लक्ष्याणि** | : | भारतीयशास्त्रज्ञानां परिचायनम्।<br>आर्यभटमधिकृत्य परिचिनोति। |
| **मूल्यम्/मनोभावः** | : | भारतीयवैज्ञानिकशास्त्रमधिकृत्य अवबोधः।<br>समेषां शास्त्राणां पठने तात्पर्योत्पादनम्। |
| **पठनलक्ष्याणि** | : | गणितशास्त्रज्ञानां योगदानमधिकृत्य लिखति।<br>केरलीयगणितशास्त्रज्ञानां लघुविवरणं लिखति।<br>समानार्थकपदानि चित्वा लिखति।<br>विना शब्दप्रयोगं परिचिनोति। |
| **पठनक्षमता** | : | शात्रज्ञानां योगदानमधिकृत्य विज्ञानमार्जयति।<br>भारतीयगणितशास्त्रमधिकृत्यावबोधः।<br>केरलीयगणितशास्त्रज्ञानां परिचायनम्। |
| **कालाशः** | : | 8 |

**पाठस्य आमुखम्**

यथा शिखामयूराणां नागनां मणयो यथा।

तथा वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम्।।

-इति वेदाङ्गज्योतिषवचनेन सर्वशास्त्राणां मध्ये गणितस्य औन्नत्यं संसूचितम्। भारतीयगणितशास्त्राय योगदानं कृतवन्तः बहवः आचार्याः सन्ति। तेष्वपि आर्यभटः, धर्मगुप्तः, महावीरः, भास्कराचार्यः, वराहमिहिरः, श्रीपतिप्रभृतयः मुख्यस्थानम् अलङ्कुर्वन्ति। केरलेष्वपि सङ्गमग्राममाधवः, पुतुमनच्चोमातिरिः, वटश्शेरि परमेश्वरः, नीलकण्ठसोमयाजीत्यादीनां गणितज्ञानां योगदानमधिकृत्य देशविदेशेष्वपि गवेषणपठनं प्रचलति। भारतीयगणितशास्त्रज्ञेषु आर्यभटः कनिष्ठिकाधिष्ठितं स्थानमलङ्करोति। अतः भारतस्य प्रथमोपग्रहस्य आर्यभट्ट इति नाम प्रदत्तम्। आर्यभटमधिकृत्य संक्षिप्तपरिचायनाय अस्ति पाठोऽयम्।

**पाठप्रवेशकः**

पूर्वस्मिन् पाठे संस्कृतभाषया आधुनिकसङ्केतमुपयुज्य सन्देशप्रेषणं कृतमिति वयं जानीमः। कथम् एवं विधं सन्देशप्रेषणं कर्तुं शक्यते। कृत्रिमोपग्रहाणां साहाय्येनैव तत् सर्वं साध्यम्। भारतराष्ट्रेण इदम्प्रथमतया विक्षिप्तः उपग्रहः कः?आर्यभट्टः एव किल। प्रसिद्धस्य भारतीयज्योतिश्शास्त्रकारस्य आर्यभटस्य स्मरणार्थमेव उपग्रहस्य तन्नामदत्तम्। इदानीं तमधिकृत्य किञ्चित् पठामः।

**पाठापग्रथनम्**

भारतीयानां गणितशास्त्रज्ञानां मध्ये प्रतःस्मरणीयो अस्ति आर्यभटः। तस्य आर्यभटीयं नाम ग्रन्थस्य , आर्यभटस्य नामधेये भारतीयशास्त्रकारैः विक्षिप्तस्य आर्यभट्टा नाम उपग्रहस्य अन्येषां

भारतीयगणितशास्त्रकाराणां च सामान्यपरिचायनाय पाठोऽयम् आयोजितः।

सामूहिकशास्त्रेषु गणितशास्त्रेषु च यथाक्रमम् उपग्रहाणां गणितशास्त्रज्ञानां सविशेषविवरणं दृश्यते। तयोः शास्त्रयोः पठनावसरे आर्यभटमधिकृत्य सामान्यज्ञानमिदं सहायकं भवति।

भारतीयगणितशास्त्रकाराणां तेषां कृतीनां परिचायनेन भारतयगणितशास्त्रविज्ञानमधिकृत्य आदरः ।

**पठनप्रवर्त्तनानि।**

**प्रवर्तनम् -1** **केरलीयानाम् इतरगणितशास्त्रकाराणां नामानि पट्टिकां लिखति।**

**पठनलक्ष्यम्** अस्माकं देशेषु विदेशेषु च लब्धजन्मानां प्रसिद्धानां गणितज्ञानानां परिचायनम्।

अध्यापिका पाठभागे संसूचितानाम् अन्येषाञ्च गणितज्ञानां नामानि समाहृत्य भारतीयानां केरलीयीनाम् अन्येषां च पट्टिकाकरणाय निर्दिशति।

**मूल्यनिर्णयसूचके**

वर्गीकरणम्, उचितक्रमीकरणम्,

| केरलीयाः गणितज्ञाः | अन्ये गणितज्ञाः |
|---|---|
| सङ्गमग्राममाधवः | ब्रह्मगुप्तः |
| नीलकण्ठसोमयाजी | महावीरः |
| वटश्शेरि परमेश्वरः | भास्कराचार्यः |
| कटत्तनाट्ट् शङ्करवर्मा | वराहमिहिरः |
| हरिदत्तः | पैथगोरस् |
| तलकुलत्त् गोविन्दभट्टतिरिः | यूक्लिड् |

| | |
|---|---|
| ज्येष्ठदेवः | पास्कल् |
| तृक्कण्टियूर् अच्युतपिषारोटिः | हैपात्तिया |
| पुतुमनसोमयाजि | |

**प्रवर्तनम् -2** **सूचनानुसारं जीवनचरितं लिखति।**

**पठनलक्ष्यम्** जीवनचरितलेखनाय ज्ञानं लभते।

अध्यापकः पाठभागस्थाः सूचनाः आधारीकृत्य सङ्गमग्राममाधवस्य जिवनचरितस्य लेखनाय निर्दिशति। लेखनावसरे जातान् दोषान् दूरीकरोति च।

**मूल्यनिर्णयसूचकानि**

**आशयावबोधः, वाक्यघटना, जीवचरित्रघटना।**

**मातृका-**

<u>सङ्गमग्राममाधवः</u>

प्रसिद्धः गणितशास्त्रज्ञः आसीत् सङ्गमग्राममाधवः सः 1340 तमे वर्षे केरलराज्यस्य इरिङ्ङालक्कुटा प्रदेशे जनिमलभत। गणितशास्त्रे अनन्तश्रेणी, त्रिकोणमितिः, बीजगणितं च अस्य योगदानमेव। वेण्वारोहः, स्फुटचन्द्राप्तिः, अगणितपञ्चाङ्गम्, अगणितग्रहाचारम् इत्येताः अनेन विरचिताः कृतयः ।1425 तमे वर्षे सः दिवंगतः।

**प्रवर्तनम् -3** **समानार्थकपदानि चित्वा लिखति।**

**पठनलक्ष्यम्** **पर्यायपदानां परिचायनं लभते।**

पाठभागं पठित्वा समानार्थकपदचयनाय निर्दिशति। आवश्यकं चेत् साहाय्यं ददाति च।

**मूल्यनिर्णयसूचके**

समानार्थपदचयनम्, औचित्यम्।

**प्रवर्तनम् -4** **उदाहरणानुसारं वाक्यं परिवर्त्य लिखति।**

**पठनलक्ष्यम्** प्रयोगविशेषं जानाति।

अध्यापकः विना शब्दस्य प्रयोगं परिचाययति। विना शब्दयोगे द्वितीया, तृतीया, पञ्चमी विभक्तयः उपयुज्यन्ते इति छात्रान् अवबोधयति। यथा - जलं/जलेन/जलात् विना जीवनं न शक्यम्। पाठभागस्थम् उदाहरणं पठित्वा शिष्टानां वाक्यानां शुद्धरूपेण लेखनाय निर्दिशति। आवश्यकं चेत् साहाय्यं ददाति च।

**मूल्यनिर्णयसूचके**

आशयावबोधः, उचितविभक्तिप्रयोगः।

**प्रवर्तनम् -5** **पाठभागं पठित्वा आर्यभटीयमधिकृत्य लघूपन्यासं लिखति।**

**पठनलक्ष्यम्** संक्षिप्तलेखनाय सामर्थ्यं लभते।

पाठभागं पठित्वा आर्यभटीयम् अधिकृत्य लघूपन्यास्य लेखनाय निर्दिशति। आवश्यकं चेत् साहाय्यं ददाति च।

**मूल्यनिर्णयसूचकानि**

आशयावबोधः, वाक्यघटना, भाषाशुद्धिः।

**मातृका-**

आर्यभटीयम्

भारतीयगणितशास्त्रज्ञेषु अतिप्रसिद्धोऽस्ति आर्यभटः। तेन विरचितः गणितशास्त्रप्रतिपादकः ग्रन्थो भवति आर्यभटीयम्। तस्मिन् काव्ये प्रायेण गणितम्, कालक्रिया, गोलम् इति क्रमेण भागत्रयम् अधिकृत्य प्रतिपादयति। अत्र गीतिकापादः, गणितपादः, कालक्रियापादः, गोलपादः इति पादचतुष्टयम् (अध्यायचतुष्टयम्) अस्ति।

**प्रवर्तनम् -5** **भारतीयशास्त्राणां शास्त्रज्ञानां / विवधानां कृत्रिमोपग्रहाणां च लघुविवरणं/चित्रीकरणं च करोतु।**

**पठनलक्ष्यम्** लघुटिप्पणीलेखनाय/चित्रीकरणाय(डोक्युमेन्डरि) सामर्थ्यं लभते।

अन्तर्जालस्य साहाय्येन अथवा ग्रन्थानां साहाय्येन लघुविवरणाय अथवा चित्रीकरणाय छात्रान् निर्दिशति। छात्राः यावच्छक्यं स्वेचछानुसारं कुर्वन्तु। अन्तरं स्खालित्यानि परिहृत्य प्रदर्शयन्तु।

**मूल्यनिर्णयसूचकानि**

दत्तसमाहरणपटुता, रचनासामर्थ्यं, चित्रीकरणवैदग्ध्यम्, क्रमीकरणचारुता, औचित्यम्,

**अग्रिमपाठसंयोजकं - प्रवर्तनम्** मानवाः विविधैः शास्त्रज्ञानैः बाह्याकाशे अन्यग्रहेषु च स्वच्छतया गच्छन्ति। विश्वविजयी इति अभिमन्यन्ते च। तथापि निस्सारेषु अपि कार्येषु ते कस्मिंश्चित् अवसरे विह्वलाः भवन्ति। स्वकीयानि इन्द्रियाणि अपि विजेतुं ते असमर्थाः भवन्ति।अतः इन्द्रियाणां जयम् अवश्यमावश्यकम् इति बोधः चर्चाद्वारा बोधनीयः।

**अधिकविस्तरः**

**अनुबन्धः** 1 **भारतीयगणितज्ञानां प्रमुखग्रन्थाः**

ब्रह्मगुप्तः - ब्रह्मसिद्धान्तः।

महावीरः - गणितसारसंग्रहः।

भास्काराचार्यः - सिद्धान्तशिरोमणिः, महाभास्करीयम्।

वराहमिहिरः - पञ्चसिद्धान्तिका।

सङ्गमग्रमाममाधवः - वेण्वारोहः, अङ्कगणितम्।

नीलकण्ठसोमयाजी- ग्रहनिर्णयः,गोलसारः,

आर्यभटीयभाष्यम्।

वटश्शेरि परमेश्वरः - लघुभास्करीयम्,
महाभास्करीयम्,
ग्रहणन्यायदीपिका।

कटत्तनाट्ट् शङ्करवर्मा - सद्रत्नमाला।

हरिदत्तः - ग्रहविचारनिबन्धनम्।

तलक्कुलत्त् गोविन्दभट्टः - दशाध्यायी।

ज्येष्ठदेवः - दृक्करणम्।

तृक्कण्टियूर् अच्युतप्पिषारोटि - गोलदीपिका,
उपरागक्रियाक्रमः।

पुतुमन सोमयाजी - करणपद्धतिः।

**अनुबन्धः 2** **आर्यभटस्य जननकालम् आर्यभटीयस्य रचनाकालञ्च।**

आर्यभटः स्वस्य जीवनकालम् आर्यभटीयस्य रचनाकालं च अधिकृत्य स्वकीये अर्यभटीयग्रन्थे कालक्रियापादे एवमुक्तम्।

षष्ट्यब्दानां षष्टिः
यदा व्यतीताः त्रयश्च युगपादाः।
त्र्यधिका विंशतिरब्दाः
तदेह मम जन्मनोतीताः।।

यदा त्रयः युगपादाः (चतुर्युगस्य प्रथमद्वितीयतृतीयपादरूपाः कृत-त्रेता-द्वापरयुगाः) व्यतीताः । (तदनु कलियुगस्य) षष्ट्यब्दानां षष्टिः च (3600 संवत्सराः) व्यतीताः। तत्रापि मम (आर्यभटस्य) जन्मनः त्र्यधिकाः विंशतिरब्दाः (आर्यभटस्य जननानन्तरं त्रयोविंशतिवत्सराः अपि) अतीताः तदा (आर्यभटीयस्य रचना कालः -इति शेषः)

पाठः ७

# नियम्यतां स्वयम्

| | | |
|---|---|---|
| **आशयः** | : | भाषा /साहित्यम् |
| **उपाशयम्** | : | भाषा सर्गात्मकता च |
| **व्यवहाररूपम्** | : | काव्यांशः |
| **उद्देश्यानि/लक्ष्याणि** | : | प्राचीनसंस्कृतसाहित्यम् अधिकृत्य विज्ञानम्। |
| | : | महाकाव्यघटनां परिचिनोति। |
| **मूल्यम्/मनोभावः** | : | कर्तव्यानि यथासन्दर्भं करणीयानि। |
| | : | स्वार्थतां विना स्वधर्माचरणम्। |
| **पठनलक्ष्याणि** | : | पद्यानि ताललयानुसारम् आलपति । |
| | : | पद्यानां गद्यक्रमं लिखति। |
| | : | नूतनपदानि चित्वा लिखति। |
| | : | पद्यानाम् आशयं लघूपन्यासरूपेण परिवर्त्य लिखति। |
| | : | संस्कृतमहाकाव्यानां महाकवीनां च पट्टिकां रचयति। |
| **पठनक्षमता** | : | महाकाव्यानि आस्वदते। |
| | | आलापनसामर्थ्यम् आर्जयति। |
| | | आशायं स्वांशीकरोति। |
| **कालांशा** | : | १२ |

**पाठस्य आमुखम्**

संस्कृते पञ्चमहाकाव्यानि प्रसिद्धानि सन्ति। तेभ्यो महाकाव्येभ्यः पूर्वं कानिचन महाकाव्यानि विरचितानि भवन्ति।तेषु अन्यतमोऽस्ति महाकवेः अश्वघोषस्य सौन्दरनन्दमहाकाव्यम्। अष्टादशसर्गेषु विरचिते सौन्दरनन्दकाव्ये नन्दस्य तत् पत्न्याः सुन्दर्याश्च कथां वर्णयति। रचनारीतेः लालित्येन तथा काव्यगुणेन च प्रसिद्धस्यास्य महाकाव्यस्य तथा तत्कर्तुःअश्वघोषस्य च सामान्य परिचायनाय सौन्दरनन्दमहाकाव्यात् उद्धृताः केचन श्लोकाः अस्मिन् पाठभागे समाकलिताः।

**प्रवेशकप्रवर्तनम्**

पूर्वस्मिन् पाठे भारतीयशास्त्रकारानधिकृत्य वयं पठितवन्तः। तस्मात्परं भारतीयसाहित्यकाराणां योगदानमधिकृत्य अस्मिन् पाठे पठामः ।

संस्कृतसाहित्ये कानि कानि महाकाव्यानि सन्ति? तेषां कर्तारः के ? महाकाव्यभेदाः के ? एतादृशरीत्या चर्चां चालयतु।छात्राणां प्रतिकरणं क्रोडीकरोतु ।

**पाठापग्रथनम्**

अश्वघोषस्य सौन्दरनन्दकाव्याद् उद्धृताः पञ्चश्लोकाः सन्ति अस्मिन् पाठभागे। श्रीबुद्धः समीपमागतं स्वकीयभ्रातरं नन्दं मनःसंयमनस्य प्राधान्यं शरीरस्य अनित्यतां चाधिकृत्य बहुभिः दृष्टान्तैः सह उपदिशति । उपदेशाः श्रवणसमये श्रोतृणां मनस्सु अप्रियत्वं जनयन्ति । तथापि ते पश्चात् हितकराः भविष्यन्ति । आयुरारोग्यमृत्युरूपाः त्रिदोषाः मानवजीवनं बाधन्ते । यावत् ते न बाधन्ते तावत् श्रेयस्कराणि कार्याणि करणीयानि । शरीरे अनित्ये तस्य बलमधिकृत्य अहङ्कारः न कार्यः इति श्रीबुद्धः नन्दमुपदिशति।

**पठनप्रवर्तनानि**

**प्रवर्तनम् -1** **पद्यानांताललयानुसारेण आलपनम्।**

**पठनलक्ष्यम्** उच्चारणस्फुटतया काव्यालापनसामर्थ्यं लभते।

पाठभागस्थितानां पद्यानां सतालम् आलपनाय छात्रान् निर्दिशतु। उच्चारणस्फुटतया आशयव्यक्ततया च आलपति चेत् अभिनन्दनं करोतु। यत्र क्लिष्टताम् अनुभवति तत्र साहाय्यं च करोतु।

**मूल्यनिर्णयसूचकानि।**

उच्चारणस्फुटता, आशयव्यक्तता, तालबोधः

**प्रवर्तनम् -2** **नवीनपदानि चित्वा अर्थं लिखतु।**

**पठनलक्ष्यम्** पदसम्पदं समार्जयति।

श्लोकेषु यत्र नूतनपदानि सन्ति तानि चित्वा शब्दकोशस्य साहाय्येन तेषामर्थं संस्कृते प्रादेशिकभाषया च टिप्पणीपुस्तके लेखनाय निर्दिशतु । अवश्यं चेत् साहाय्यमपि ददातु ।

**मूल्यनिर्णयसूचकानि।**

औचित्यम्, चयनसामर्थ्यम्, अर्थव्यक्तता।

**प्रवर्तनम् -3** **गद्यक्रमलेखनम्।**

**पठनलक्ष्यम्** आकांक्षारूपेण श्लोकानाम् अन्वयलेखनसामर्थ्यं लभते।

आकांक्षापूर्वं प्रश्नान् पृष्ट्वा श्लोकस्य गद्यक्रमलेखनाय निर्दिशतु ।

**मूल्यनिर्णयसूचकानि।**

वाक्यघटना, आशयपूर्णता, सर्वेषां पदानां स्वीकरणम्।

यथा-

अस्मिन् प्रथमश्लोके क्रियापदं किम् ? - ददाति ।

कः ददाति? - वैद्यः

| | | |
|---|---|---|
| कस्मै ददाति? | - | आतुराय |
| किं ददाति | - | औषधम् |
| कथं ददाति ? | - | निगृह्य |
| कीदृशमपि ददाति | - | अनिष्टमपि |
| किमुक्तम् | - | प्रतिकूलमुक्तम् |
| पुनः कीदृशमुक्तम् | - | हितोदर्कम् |
| कस्मै उक्तम् | - | तुभ्यम् |
| किमर्थम् उक्तम् | - | अनुग्रहाय |

एवं रीत्या प्रश्नान् पुनःपुनः पृष्ट्वा, छात्रेषु आकाङ्क्षाम् उत्पाद्य, यथाक्रमं श्लोकस्थितानि अव्ययानि च संयोज्य गद्यक्रमलेखनं करणीयम्।

**प्रवर्तनम् -4** **पद्यानामाशयलेखनम् ।**

**पठनलक्ष्यम्** पद्यं पठित्वा भावार्थलेखनाय सामर्थ्यं लभते।

गद्यक्रमानुसारं प्रादेशिकभाषया संस्कृतभाषया च श्लोकानाम् आशयं लिखतु। अवश्यमपि साहाय्यं देयम्।

(अधिकवाचनाय पद्यानां भाषाविवर्तनम् अनुबन्धे प्रदत्तमस्ति।)

**मूल्यनिर्णयसूचकानि।**

वाक्यघटना, आशयपूर्णता, भाषाशैली।

**प्रवर्तनम् -5** **इष्टतमस्य पद्यस्याशयम् लघूपन्यासरूपेण लिखतु ।**

**पठनलक्ष्यम्** आस्वादनटिप्पणी लेखनाय नैपुण्यम् आर्जयति।

पाठस्थेभ्यः पद्येभ्यः इष्टतमं पद्यं स्वीकृत्य तस्य आशयं लघूपन्यासरूपेण लेखनाय छात्रान् निर्दिशति। कवेः काव्यस्य च सूचना उपन्यासस्य उपक्रमे अवश्यमावश्यकी इति सूचना च प्रददाति।

**मूल्यनिर्णयसूचकानि।**

उपन्यासघटना, आशयपूर्णता, भाषाशैली।

**मातृका-** श्लोकः - अनिष्टमप्यौषधमातुराय................॥

सौन्दरनन्दमहाकाव्यं महाकविना अश्वघोषेण विरचितं भवति । तेन बौद्धधर्मप्रचारणाय काव्यमिदं कृतम्। तस्मात् काव्याद् उद्धृतोऽयं श्लोकः ।बुद्धस्य कनिष्ठसोदरः भवति नन्दः। सः सुखलोलुपः आसीत् ।भोगेषु आसक्तं स्वभ्रातरं नन्दं बौद्धधर्माभिमुखं कर्तुं बुद्धः तम् उपदिशति । भाविश्रेयस्सूचकस्तथा हितकरोऽपि उपदेशः श्रोतृणाम् श्रवणसमये सदा अप्रियत्वं जनयति इति दृष्टान्तेन कथयति। रोगी अप्रियं प्रकटयन्नपि चिकित्सकः रोगशमनौषधं बलेन तम् पाययति। तथा मम उपदेशवाक्यानि भवते इदानीम् श्रवणपरुषाण्यपि पश्चात् हितकराणि अनुग्रहप्रदायकानि च भविष्यन्ति। इदमेव पद्यस्यास्य आशयः।

**प्रवर्तनम् -6** **संस्कृतकवीनां काव्यानां च सचित्रसम्पुटरचना।**

**पठनलक्ष्यम्** संस्कृतकवीनां काव्यानाञ्च परिचायनम्।

अन्तर्जालस्य साहाय्येन वा ग्रन्थानां साहाय्येन वा दत्तशेखरणं कृत्वा कोलाष्/वीडियो/प्रसन्डेषन् रूपेण वा चित्रसम्पुटं यावच्छक्यं निर्मातु, अवतारयतु।

मूल्यनिर्णयसूचकानि

औचित्यम्, चित्रीकरणचारुता, अवतरणशैली।

**अनुबन्धम्-1** **पद्यानां कैरलीभाषाविवर्तनम्**

വൈദ്യൻ കൊടുക്കുന്നു ബലേന രോഗി-
ക്കനിഷ്ടമാണെങ്കിലുമൗഷധത്തെ

അമ്മട്ടു ഞാനോതിയ വാക്കു നിന്റെ
ഹിതത്തിനാണപ്രിയമാകിലും കേൾ.

എന്നാൾ വരേക്ക്ലോ ക്ഷണമാത്രമായു,-
സ്സെത്തുന്നതെന്നോ മരണം, വയസ്സും-
കാര്യക്ഷമം നില്ക്കുവതെന്നു,മന്നേ-
വരേക്കു ശ്രേയസ്സിൽ മനസ്സിരുത്തൂ
നടപ്പിരിപ്പും കുടി തീറ്റയും കുറ-
ഞ്ഞിരിക്കിലും കൂടിയിരിക്കിലും ക്ഷണം
ശരീരമാപത്തിലുലഞ്ഞു കാൺകെ, നിൻ-
ബലത്തിലിമ്മട്ടഭിമാനമെങ്ങനെ?

കടുത്തചൂടേറ്റുഴലുന്നവൻ തണു-
പ്പാശിപ്പു, ചൂടിന്നു തണുപ്പിലാണ്ടവൻ
വിശക്കുവോനന്നമഹോ! പിപാസിതൻ
ജലത്തെ; യാർക്കെ-ന്തെ-വിടുന്നു താൻ ബലം?

ബലത്തിനാളെന്നു സ്വയം നിനയ്ക്കുകിൽ
കരുത്തു നീ കാട്ടുകയിന്ദ്രിയങ്ങളിൽ
ജയിക്കുകിൽ നിന്റെ ബലം മഹത്തരം
തോറ്റാലഹോ! നിന്റെ ബലം സുനിഷ്ഫലം.

(വിവർത്തനം- ഹരിപ്രസാദ് കടമ്പൂര്)

**अनुबन्धम्-2** **अश्वघोषः कृतयः च**

प्राचीनभारतीयसंस्कृतमहाकविषु सुप्रसिद्धोऽस्ति अश्वघोषः। सः कालिदासस्य पूर्ववर्ती इति विदुषां मतम्। अस्य जीवनकालमधिकृत्य विभिन्नाभिमतो दृश्यते । तथापि सः आर्यसुवर्णाक्ष्याः पुत्र इति स्वस्य सौन्दरनन्दकाव्ये सूचनां ददाति। सौन्दरनन्दं बुद्धचरितम् इति महाकाव्यद्वयं, शारीपुत्रप्रकरणं, सूत्रालङ्कारः वज्रसूची,

महायानश्रद्धोत्पादकशास्त्रम् इत्यादयः ग्रन्थाः अश्वघोषेण विरचिताः भवन्ति। न केवलं भारते तथापि चीना तिबट्ट् इत्यादिषु राष्ट्रेष्वपि एते ग्रन्थाः प्रचुराः अभवन्। अश्वघोषस्य रचनाशैली कालिदासस्य समाना एव इति कथ्यते।

**सौन्दरनन्दं महाकाव्यम्**

अष्टादशसर्गेषु निबद्धेऽस्मिन् महाकाव्ये गौतमबुद्धानुजस्य नन्दस्य तत्पत्न्याः सुन्दर्याश्च कथां वर्णयति। सुन्दर्याः नन्दस्य च इतिवृत्तम् अधिकृत्य कृतं महाकाव्यम् इत्यर्थे सौन्दरनन्दम् इति प्रसिद्धे महाकाव्ये बुद्धधर्ममेव उपदिशति। काव्योत्कर्षदृष्ट्या सौन्दरनन्दं बुद्धचरितमहाकाव्यमपि अतिशेते ।

पाठः ८

# गच्छामो वयम्

| | | |
|---|---|---|
| **आशयः** | : | भाषासाहित्यम् |
| **उपाशयम्** | : | भाषा सर्गात्मकता च |
| **व्यवहाररूपम्** | : | यात्राविवरणम् (दैनिकी) |
| **उद्देश्यानि/लक्ष्याणि** | : | कलारूपाणि, यात्राविवरणानि, दैनिकीरचना एतानि परिचिनोति। |
| **मूल्यम्/मनोभवः** | : | कलारूपाण्यधिकृत्य विशेषज्ञानं लभते। |
| | : | यात्रया विवधानां सांस्कारिककेन्द्राणां परिचायनम्। |
| **पठनलक्ष्याणि** | : | इष्टतमयात्रायाः दैनिकीं रचयति । |
| | : | कलारूपाणां चित्राणि समाहरति। चित्रसम्पुटं सज्जीकरोति। |
| | : | यात्रासूचीं सज्जीकृत्य लिखति। |
| | : | यद्यपि-तथापि उपयुज्य वाक्यनिर्माणं करोति। |
| | : | लट्, लङ्, लृट् लकाराणां प्रयोगपरिचयं सम्पादयति। |
| **पठनक्षमता** | : | दैनिकीलेखनसामर्थ्यम्। |
| | : | उचितनां क्रियापदानां प्रयोगसामर्थ्यम् |
| | : | प्रयोगविशेषज्ञानं लभते। |
| **कालांशः** | : | 12 |

**पाठस्य आमुखम्** अध्ययनयात्रावसरे राधिका कलामण्डलं गत्वा यात्रायाः अनुभवान् प्रतिपादयति। तदनु तया लिखितां दैनिकीं पाठभागेऽस्मिन् विवृणुते। दैनिकीपठनावसरे कलारूपाणां केरलकलामण्डलस्य च वैशिष्ट्यम् अवगम्यते ।

**प्रवेशकप्रवर्तनम्** अध्यापकः कस्याश्चित् यात्रायाः एकं चित्रं/वीडियो प्रदर्शयति। अनन्तरं यात्रायाः महत्त्वमधिकृत्य छात्रान् कांश्चन प्रश्नान् पृच्छति।

यथा - भवन्तः कुत्रापि विनोदयात्रां कृतवन्तः वा ?

यात्रायाः महत्त्वमधिकृत्य वक्तुं शक्यते वा ?.....

छात्राः तैः कृतां यात्रामधिकृत्य स्वानुभवान् कथयन्ति। अध्यापकः क्रोडीकृत्य वदति। पुनः पृच्छति च। भवन्तः यात्रां समाप्य यात्राविवरणं लिखन्ति वा ? यात्राविवरणं कथं लिखन्ति ? तर्हि इदानीम् एकं यात्राविवरणं पठामः।

**पाठापग्रथनम्** राधिका सुहृद्भिः साकं विद्यालयात् पठनयात्राम् अकरोत्। यात्रायाः मनोहारितां दृश्यानाञ्च महत्त्वप्रतिपादकं यात्राविवरणम् अलिखत् च। तृश्शिवपेरूर्, कलामण्डलम्, भारतपुषा, प्राक्तनकलामण्डलम् इत्यादीनि स्थानानि पाठभागेऽस्मिन् वर्णयति ।

**पठनप्रवर्तनानि**

**प्रवर्तनम् -1** **स्वकृतयात्रायाः दैनिकीं रचयतु।**

**पठनलक्ष्यम्** दैनिकीलेखनम्।

अध्यापकः विविधप्रदेशानां नामानि दत्वा संघान् रूपीकरोति। यथा-गोवा, तिरुवनन्तपुरं, वयनाट् इत्यादीनि। तत्रत्यानां विशेषस्थानानां नामानि सञ्चिनोतु इति निर्दिशति । स्थानानां विशेषताः काः इत्यपि सूचयति। संगृहीतान् अंशान् उपयुज्य लघुदैनिकीं लिखतु

इति कथयति। दैनिकी कथं लेखनीया इति परिचाययति । संघेषु एकः कक्ष्यायाम् अवतारयति । ततः अध्यापकः दोषान् निवार्य श्यामफलके लिखति । एवं प्रतिदिनं दैनिकीलेखनाय छात्रान् प्रेरयति। कक्ष्यायाम् अवतारयति।

**मूल्यनिर्णयसूचकानि**

वाक्यघटना, आशयव्यक्तता, प्रक्रमः, आकर्षणीयता, स्मरणसामर्थ्यम्

**प्रवर्तनम् -2** **विविधकलारूपाणां चित्राणि समाहृत्य चित्रसञ्चयं सज्जीकरोतु ।**

**पठनलक्ष्यम्** विवधाननां कलारूपाणां परिचायनम्।

अध्यापकः संस्कृतकलारूपाणि, विदेशकलारूपाणि, शास्त्रीयकलारूपाणि, प्रादेशिककलारूपाणि इत्यादीनि नामानि दत्वा संघान् रूपीकरोति। यथा- कूटियाट्टम्, कथाकेली, ओट्टन् तुल्लल्, यक्षगानम्, मोहनियाट्टम् , कथक्, तेय्यम् ......। गृहकार्यरूपेण एतेषां कलारूपाणां चित्राणां सञ्चयनाय प्रतिसंघं निर्दिशति। समाहृतानि चित्राणि उपयुज्य चित्रसञ्चयं/सम्पुटम्/टिजिट्टल् आल्बं वा निर्माति । कक्ष्यायां प्रदर्शयति च।

**मूल्यनिर्णयसूचकानि**

सञ्चयनसामर्थ्यम्, क्रमीकरणवैविध्यम्, आकर्षणीयता ।

**प्रवर्तनम् -3** **उदाहरणमनुसृत्य विद्यालयीयविनोदयात्रायै यात्रासूचीं रचयतु।**

**पठनलक्ष्यम्** समयानुसारं यात्रां सज्जीकर्तुं परिचयं लभते।

अध्यापकः विनोदयात्रायाः विविधानि चित्रशकलानि ददाति/ प्रदर्शयति। अनन्तरं वैयक्तिकरूपेण स्वेच्छानुसारम् उद्दिष्टायाः यात्रायाः समयसारिणी निर्माणाय निर्दिशति। समयक्रमीकरणाय साहाय्यमपि ददाति। ततः छात्राः यात्रासूचीं स्फोरकपत्रे विलिख्य प्रकाशयति

स्थापयति च। यथासमयम् अध्यापकः साहाय्यमपि ददाति।

**मूल्यनिर्णयसूचकानि**

संक्षिप्तता , समयक्रमः, आकर्षणीयता।

**प्रवर्तनम् -4** **यद्यपि-तथापि उपयुज्य वाक्यपरिवर्तनम्।**

**पठनलक्ष्यम्** प्रयोगविशेषं जानाति।

अध्यापकः यद्यपि-तथापि इति प्रयोगमधिकृत्य विशदीकरोति। ततः अभ्यासपत्रिकां ददाति। उदाहरणानुसारं यद्यपि-तथापि उपयुज्य वाक्यपरिवर्तनाय निर्दिशति।

यथा- सिन्धुः रोगी आसीत्। गृहकार्यम् अकरोत्।

**यद्यपि** सिन्धुः रोगी आसीत् **तथापि** गृहकार्यम् अकरोत्।

**यद्यपि** वृष्टिः भवति **तथापि** बालकाः क्रीडाङ्कणे क्रीडन्ति।

**यद्यपि** मम वेदनं न्यूनं भवति **तथापि** अहं धनसञ्चयं करोमि।

**यद्यपि** ज्वरः अस्ति **तथापि** गृहकार्यं करोति।

**मूल्यनिर्णयसूचकम्**

उचितस्थाने यद्यपि तथापि इत्येतयोः प्रयोगः।

**प्रवर्तनम् -5** **चित्रं दृष्ट्वा लट्-लङ् –लृट् वाक्यानि मातृकानुसारं लिखतु।**

**पठनलक्ष्यम्** लकाराणां सामन्यपरिचायनम् ।

अध्यापिका पदसूर्यं प्रदर्शयति। तत्र मध्ये विनीता इति कर्तृपदं पार्श्वस्थानां रश्मीनां मध्ये कर्मपदानि च सन्ति। तानि उपयुज्य लट्-लङ्-लृट् क्रियापदानां योजनेन वाक्यनिर्माणाय निर्दिशति। यथा- विनीता दैनिकीं लिखति(लट्) । विनीता दैनिकीम् अलिखत् (लङ्) विनीता दानिकीं लेखिष्यति। (लृट्) एवं मातृकारूपेण लेखनाय निर्दिशति।

करोति अकरोत् करिष्यति

| | | |
|---|---|---|
| गच्छति | अगच्छत् | गमिष्यति |
| पश्यति | अपश्यत् | द्रक्ष्यति |
| रचयति | अरचयत् | रचयिष्यति |

उदा- राधिका नाटकं पश्यति।

राधिका नाटकम् अपश्यत्।

राधिका नाटकं द्रक्ष्यति।

अभ्यासलेखनानन्तरम् एतादृशानि अन्यानि स्फोरकपत्राणि निर्मातु इति निर्दिशति। छात्राः निर्मीय प्रदर्शयन्ति च।

**प्रवर्तनम् -6** **यात्रानुभवस्य विवरणात्मक वीडियोनिर्माणम् (व्लोग्) अवतरणञ्च करोतु।**

**पठनलक्ष्यम्** यात्रविवरणरचना/चित्रीकरणसामर्थ्यम् लभते।

अस्य पाठस्य पाठनान्तरम् अध्यापिका एकां पठनयात्राम् आयोजयति। पठनयात्रा समये दूरवाण्याः वा अन्येषाम् उपकरणानां साहाय्येन स्वेच्छानुसारं पठनयात्रायाः शकलानि चित्रीकरणाय निर्दिशति। पठनयात्रानन्तरं संस्कृतशब्दमिश्रणेन साकं पठनयात्रायाः वीडियो (व्लोग्) निर्माणाय अवतारणाय च निर्दिशति। उचितसाहाय्यमपि ददाति।

**मूल्यनिर्णयसूचकानि**

चित्रीकरणपटुता, आशयपूर्णता, औचित्यम्।

# एककम् ४
# प्रसूनम्

## आमुखम्

गच्छता कालेन मुकुलितं सस्यं पुष्पितं भविता। तद्वत् गतेषु एककेषु पठितैः लघुलघुगुणैः परिपक्वतामाप्तेभ्यः छात्रेभ्यः मानविकतायाः मकुटमणिं धर्तुं मानविकताविषयप्रदिपादकमिदम् एककं प्रसूनमिति नाम्ना अत्र प्रदीयते। मानवः यदा मानविकतां धरति तदा एव सः मानवो भवति । स्नेहः, पारस्पर्यम्, मैत्री, उपकारिता, करुणा, आर्द्रता इत्यादिभिः गुणैः मानवः विश्वमिदम् एकनीडं करोति।

एककेस्मिन् मानविकताप्रतिपादकौ द्वौ पाठौ समाकलितौ भवतः। मातुस्स्नेहस्य पुरतः उन्नतोपि तनयः निस्सार इति स्मारयन्ती **कारुण्यम्** नामिका पटकथा प्रथमा। **मुक्तासौभगमिति** द्वितीये कालिदासस्य तूलिकाप्रसूतिभ्यः अभिज्ञानशाकुन्तलम्, रघुवंशम्, मेघदूतम् इत्येताभ्यः कृतिभ्यः सञ्चितः मानविकतासूचकः एकैकः श्लोकश्च समाकलितः। विश्वे विद्यमानेषु समेषु प्राणिषु अपि आत्मभावनां द्रष्टुं येन शक्यते स भवत्युत्तमः इति खलु। तादृशं चिन्तादर्शनं परिचिनुमः।

पाठः ९

# कारुण्यम्

| | | |
|---|---|---|
| **आशयः** | : | मानविकता |
| **उपाशयम्** | : | अनुतापः। |
| **व्यवहाररूपम्** | : | पटकथा। |
| **उद्देश्यानि/लक्ष्याणि** | : | मानविकता इति मूल्यं प्रत्यभिजानाति।<br>पटकथारचनां परिचिनोति। |
| **मूल्यम्/मनोभवः** | : | कारुण्यम् आर्द्रता इत्यादीनि मूल्यानि स्वांशीकरोति |
| | : | पटकथारचना, चित्रीकरणम्, इत्यादिषु<br>विषयेषु आभिमुख्यं जनयति। |
| **पठनलक्ष्याणि** | : | पटकथासाहित्यं परिचिनोति। |
| | : | चलच्चित्रनिदेशकयोः पट्टिकां लिखति। |
| | : | पटकथां रचयति। |
| | : | तुमुन्नन्तप्रयोगेन वाक्यरचनां करोति। |
| | : | सम्बोधनपदानि चित्वा लिखति। |
| **पठनक्षमता** | : | कथारचनासामर्थ्यमार्जयति। |
| | : | चित्रीकरणपाटवं लभते। |
| | : | मानविकमूल्यानि स्वाशीकरोति। |
| | : | समानाशययुक्ताः पटकथाः सञ्चिनोति। |
| **कालांशः** | : | 12 |

**पाठस्य आमुखम्** पूर्वस्मिन् पाठे विवधानि कलारूपाण्यधिकृत्य किञ्चित् ज्ञानं प्राप्नुवन्तो वयम्। नृत्यादिषु कलासु अभिनयं प्राधान्यमर्हति। नूतनकलानां मध्ये अभिनयप्रधानम् अन्यतमं कलारूपं भवति चलच्चित्रम्। कथकल्याः साहित्यम् आट्टक्कथा इति यथा प्रसिद्धं भवति तथा चलचित्रस्य साहित्यं पटकथा इति नाम्ना व्यवह्रियते। अस्मिन् पाठे पटकथासाहित्यमधिकृत्य परिचिनुमः।

**प्रवेशकप्रवर्तनम्** अध्यापकः छात्रान् गणे निवेश्य तेभ्यः एकैकं विषयं कथाविष्काराय ददाति। संघे चर्चां कृत्वा छात्राः लघुकथायाः निर्माणं कुर्वन्ति। निर्मितां कथां नाटकरूपेण कक्ष्यायाम् अवतारयन्तु इति तान् निर्दिशति। छात्राः आगत्य कथापात्रानुगुणम् अवतारणाय सिद्धाः भवन्ति। किन्तु प्रथमं केन आगन्तव्यम्, कथम् आरम्भः भवेत्? द्वितीयस्य प्रवेशकप्रवर्तनम् कदा भवति? कः वेषः करणीयः? इत्यादि कार्येषु छात्राणां सन्देहः आगच्छेत्। उचिताभ्यासस्य अभावेन छात्राः क्लेशम् अनुभवन्ति। तदानीम् अध्यापकः अभ्यासस्य आवश्यकतां बोधयति। अवतारणाय प्रत्येकं छात्राय निर्देशं प्रदातुं पूर्वालोचना आवश्यकी इति च बोधयति। एवं पूर्वसिद्धतां विधातुं चिन्ता करणीया। एतादृशी विचारकल्पना एव चलच्चित्रनिर्माणाय अत्यन्तापेक्षितः घटकः। सा पटकथा इति अभिधीयते। अस्मिन् पाठे एकां चित्रीकरणपटकथामधिकृत्य पठामः।

**पाठापग्रथनम्** जननी इति संस्कृतह्रस्वचित्रस्य षष्ठं दृश्यमेव पाठभागत्वेन प्रदत्तमस्ति। दृश्ये सामान्यस्थानम् (Normal Location), विशेषस्थानम् (Special Location), समयः (Time), कथापत्राणि (Characters) इत्यादि प्राथमिकसूचनाः प्रदत्ताः सन्ति। षष्ठं दृश्यं

चिकित्सालयस्य अपरस्मिन् प्रकोष्ठे प्रवर्तते। तस्मिन् रङ्गे विवेकः, तस्य पत्नी, विलासिनी, रजीषः, तस्य माता च सन्ति। विवेकस्य यकृत्परिवर्तनानन्तरं तस्य प्राणदातारं मेलितुं रजीषः तम् अपरं प्रकोष्ठं नयति। तत्र प्रकोष्ठे स्वमातरं विलासिनीं दृष्ट्वा विवेकः पत्नी च स्तब्धौ भवतः। विवेकः पश्चात्तापवशेन विलपति। रजीषस्य मातुः सहायिकारूपेण कर्म कुर्वती आसीत् विलासिनी। अत एव विलासिन्याः मानसिकव्यथां सा सम्यक् जानाति। अवसरेस्मिन् रजीषस्य माता विवेकम् इदं स्मारयति यत् त्वया वृद्धभवने परित्यक्ता इयं माता तव रोगावस्थां विज्ञाय कियत् दुःखमनभूतवती इति जानासि? इति। अनेन प्रश्नेन विवेकः स्वापराधम् अभिजानाति। मातरं परित्यज्य पत्न्या साकं सुखेन जीवनं नेतुम् उद्युक्तस्य विवेकस्य दुष्टावस्थायां सा माता एव प्राणदात्री अभवत्। माता नाम अनिशं नन्दनसङ्कटमात्मवत् गृहीत्वा स्वयं दहति। यथा बाल्ये शिशवः पितृभ्यां रक्षणीयाः भवन्ति तथा वार्धक्ये पितरौ पुत्रैः संरक्षणीयौ भवतः।

**पठनप्रवर्तनानि**

**प्रवर्तनम् -1**

**मानविकतायाः च्युतिः इति विषये चर्चां करोतु।**

**पठनलक्ष्यम्**

मानविकता इति विषये मूल्यबोधं जनयति।

साम्प्रतिके काले मानविकतायाः च्युतिः सम्भवति वा इत्यस्मिन् विषये सङ्घशः चर्चां कृत्वा कक्ष्यायाम् अवतारयन्तु छात्राः।

**मूल्यनिर्णयसूचकानि**

भागभागित्वम्, आशयस्पष्टता, अवतरणरीतिः।

**प्रवर्तनम् -2** **सहजीविस्नेहः इति विषये प्रभाषणम् अवतारयतु।**

**पठनलक्ष्यम्** विषयानुसारं प्रभाषणं कर्तुं सामर्थ्यमार्जयति।

सहजीविस्नेहः इत्यस्मिन् विषये सङ्घशः चर्चां कृत्वां प्रभाषणमेकं सज्जीकृत्य अवतारयन्तु।

**मूल्यनिर्णयसूचकानि**

आशयस्पष्टता, शब्दक्रमीकरणम् , उच्चारणशुद्धिः।

**प्रवर्तनम् -3** **चलचित्राणां पटकथामधिकृत्य संवादं करोतु।**

**पठनलक्ष्यम्** विषयनिरूपणसामर्थ्यम् आर्जयति।

संस्कृतभाषायां निर्मितानि नैकानि ह्रस्वचलच्चित्राणि सन्ति। तानि कक्ष्यायां प्रदर्शनाय अवसराः कल्पनीयाः। तानि चित्राणि विलोक्य चलच्चित्रनिर्माणे पटकथायाः विशेषता का इति संवादं चालयतु। (संस्कृतचलच्चित्राणां युटूब् लिङ्क् एकत्र संस्थाप्य पिडिएफ् प्रसन्टेशन् द्वारा प्रदर्शयितुं शक्यते)

**मूल्यनिर्णयसूचकानि**

आशयस्पष्टता, शब्दक्रमीकरणम् , उच्चारणशुद्धिः।

**प्रवर्तनम् -4** **विषयानुसारं पटकथां रचयतु।**

**पठनलक्ष्यम्** पटकथारचनासामर्थ्यं लभते।

अध्यापकः अनुकम्पा, परस्पराश्रयत्वम्, वात्सल्यम् इत्यादिविषयान् छात्रेभ्यः ददाति। विषयेस्मिन् पटकथां विरचय्य अवतारयन्तु इति निर्दिशति। छात्राः सङ्घशः विचार्य लिखन्तु।

**मूल्यनिर्णयसूचकानि**

आशयस्पष्टता, औचित्यम् , भाषाशुद्धिः, विषयक्रमीकरणचारुता।

**प्रवर्तनम् -5** **उदाहरणानुसारं वाक्यं परिवर्तयतु।**

**पठनलक्ष्यम्** प्रयोगविशेषानुसारं वाक्यरचनासामर्थ्यं लभते।

अध्यापिका वाक्यद्वयं प्रदर्श्य तुमुन्नन्तपदमुपयुज्य एकवाक्येन परिवर्तयितुं निर्दिशति। उदाहरणानुसारं छात्राः वाक्यद्वयं तुमुन्नन्तपदेन योजयन्तु।

**मूल्यनिर्णयसूचकानि**

वाक्यघटना, उचिस्थाने तुमुन्नन्तस्य प्रयोगः, आशयव्यक्तता।

उदा - षाजी पुस्तकशालां गच्छति। सः पुस्तकं पठिष्यति।

षाजी पुस्तकं पठितुं पुस्तकशालां गच्छति।

अनामिका क्रीडितुं क्रीडाङ्गणं गच्छति।

मीनाक्षी अध्यापिका भवितुं परीक्षां लिखति।

अतुलः मार्गविघ्नं निवारयितुं वाहनं स्थगयति।

रह्मत् धनं सम्पादयितुं कथां रचयति।

**अत्र अवधेयः**

अत्र वाक्ययोः योजनाय तुमुन् प्रत्ययः प्रयुक्तः। अत्र अवधेयः अंशः तु वाक्यद्वयेपि कर्ता एक एव भवेत्। भाविकालार्थक्रियायाः प्राप्तये एव तुमुन् प्रत्ययः प्रयुङ्क्ते। माता पुस्तकं पठितुं पुत्रं निर्दिशति इत्यस्मिन् वाक्ये तुमुन् प्रत्ययस्य प्रयोगः असाधु भवति। यस्मात् अत्र पठनक्रियायाः कर्ता पुत्रः भवति, तथा च निर्देशनक्रियायाः कर्ता माता भवति। अतः अत्र दोषः एव। माता पुस्तकपठनाय पुत्रं निर्दिशति इति तस्य शुद्धप्रयोगः। कानिचन तुमुन् प्रत्ययान्तानि पदानि अत्र दीयन्ते।

| | | | |
|---|---|---|---|
| लट् | तुमुन् | लट् | तुमुन् |
| गच्छति | गन्तुम् | निवारयति | निवारयितुम् |
| प्रविशति | प्रवेष्टुम् | नयति | नेतुम् |
| क्रीडति | क्रीडितुम् | चिन्तयति | चिन्तयितुम् |
| प्राप्नोति | प्राप्तुम् | चलति | चलितुम् |
| पठति | पठितुम् | करोति | कर्तुम् |
| लिखति | लेखितुम् | स्मरति | स्मर्तुम् |
| वदति | वदितुम् | पिबति | पातुम् |
| धावति | धावितुम् | खादति | खादितुम् |
| सम्पादयति | सम्पादयितुम् | नमति | नमितुम् |
| त्यजति | त्यक्तुम् | जानाति | ज्ञातुम् |
| प्रतिपादयति | प्रतिपादयितुम् | शृणोति | श्रोतुम् |
| विलोचयति | विलोचयितुम् | चिनोति | चेतुम् |
| विवेचयति | विवेचयितुम् | उत्तिष्ठति | उत्थातुम् |
| तरति | तर्तुम्/तरितुम् | उपविशति | उपवेष्टुम् |

**प्रवर्तनम् -6** **सम्बोधनपदं चित्वा लिखतु।**

**पठनलक्ष्यम्** पदानां विभक्तिज्ञानं लभते।

पाठभागात् सम्बोधनपदानि चित्वा लिखति।

यथा - विवेक!, अम्ब!, पुत्र!

**मूल्यनिर्णयसूचके**

विभक्तिज्ञानम्, उचितपदचयनम्।

**प्रवर्तनम् -7** **चलचित्र- निदेशकयोः नामानि उपयुज्य पट्टिकां पूरयतु।**

**पठनलक्ष्यम्** यथोचितं पट्टिकां पूरयितुं ज्ञानं लभते।

पाठपुस्तके दत्तस्य अधिकवााचनांशस्य तथा च अनुबन्धे दत्तस्य पट्टिकायाश्च साहाय्येन पट्टिकां पूरयतु।

यथा-

| चलच्चित्रस्य नाम | निदेशकस्य नाम |
|---|---|
| आदिशङ्कराचार्यः | जी.वि.अय्यर् |
| भगवद्गीता | जी.वि.अय्यर् |
| प्रियमानसम् | विनोद् मङ्करा |
| इष्टिः | जी.प्रभा |
| अनुरक्तिः | पि.के.अशोकन् |

**मूल्यनिर्णयसूचकम्**

उचितरीत्यापूरणसामर्थ्यम्

**प्रवर्तनम् -7** **लघुपटकथां विरचय्य लघुचलच्चित्रं/रील्स् निर्माणं करोतु**

**पठनलक्ष्यम्** पटकथारचना, अभिनयः, चायाग्रहणं, चित्राकरणम्, प्रसाधनम्, शब्दाङ्कनम्, शब्दमिश्रणम्, वर्णविधानम्, अलङ्करणम् इत्यादिषु विविधासु मेखलासु प्रावीण्यसम्पादनम्।

पटकथासाहित्यस्य परिचयः पाठभागे दीयते। चलच्चित्रसम्बन्धप्रवर्तनानि सर्वाणि अपि अत्र परिशीलयितुं शक्यते। पटकथालेखनम्, अभिनयः, चित्रीकरणम्, छायाग्राहीप्रयोगः, चित्रसम्पादनम्, चित्रमिश्रणम्, शब्दाङ्कनम्, दृश्यालङ्करणम्, शब्दालङ्करणम्, प्रसाधनप्रवर्तनम् इत्यादीनि च अनेन सह वर्तन्ते। तदर्थं एकां पटकथां विलिख्य लघुचित्रणं करोतु, अवतारयतु।

**मूल्यनिर्णयसूचकम्**

औचित्यपूर्वं विविधासु मेखलासु यत्र यत्र गुणपूर्णता दृश्यते तत्र तत्र मूल्यनिर्णयः करणीयः।

**अग्रिमपाठसंयोजकं-प्रवर्तनम्** अस्मिन् पाठे मानविकतामधिकृत्य अपठाम। मानविकता केवलं मानवानां समूहे अस्ति वा ? इति चर्चां करोति। प्रपञ्चेषु सर्वत्र परस्परस्नेहं कारुण्यम् इत्यादिनि द्रष्टुंशक्यन्ते इति क्रोडीकरोति। महाकवीनां कृतिषु परस्परस्नेहस्य वर्णना सर्वत्र अस्ति खलु । एवं चेत् पठितपूर्वाणि कानिचन पद्यानि अवतरन्तु।

**अनुबन्धः-1** **संस्कृतचलच्चित्रस्य निदेशकानां पट्टिका**

१९८३ वर्षादारभ्यते संस्कृतचलच्चित्राणां लोकार्पणम्। ततः पश्चात् कस्मिन् संवत्सरे किं चलच्चित्रं कस्य निदेशने बहिरागतमिति ज्ञानं संस्कृतप्रेमिणां कृते अवश्यं भवेत्। अतः चलच्चित्राणां तेषां निदेशकानां च नामावलिः अधः दीयते।

| वर्षः | चलच्चित्रस्य नाम | निदेशकस्य नाम |
|---|---|---|
| १९८३ | आदिशङ्कराचार्यः | जी.वि.अय्यर् |
| १९९३ | भगवद्गीता | जी.वी.अय्यर् |
| २०१४ | प्रियमानसम् | विनोद् मङ्करा |
| २०१६ | इष्टिः | जी.प्रभा |
| २०१७ | सूर्यकान्तः | एम्.सुरेन्द्रन् |
| २०१७ | अनुरक्तिः | पि.के.अशोकन् |
| २०१९ | मधुरस्मितम् | सुरेष् गायत्री |
| २०२० | पुण्यकोटिः | रवि शङ्कर् वी. |
| २०२० | अगोचरार्णवः | पूर्णिमा आर्.अय्यर् |
| २०२१ | प्रतिकृतिः | डा.निधीष्.गोपिः |
| २०२१ | नमो | विजेष् मणिः |
| २०२१ | समस्या | षिबु कुमारनल्लूर् |

| | | |
|---|---|---|
| २०२१ | शाकुन्तलम् | दुष्यन्त् श्रीधर् |
| २०२१ | भगवदज्जुकम् | यदु विजयकृष्णन् |
| २०२२ | तया | जी.प्रभा |

**अनुबन्धः-2 पटकथासाहित्यम् (अधिकवाचनांशः)**

काव्यं दृश्यं श्रव्यमिति द्विधा भवति। संस्कृतभाषायां द्वयोः विभागयोः अपि अनेके ग्रन्थतल्लजाश्च सन्ति। प्रत्येकं विभागस्य उपविभागाः अपि विद्यन्ते। आधुनिके काले अत्यधिकं प्रचारमुखे वर्तमाना साहित्यशाखा भवति पटकथा। संस्कृतभाषायामपि पटकथासाहित्यं विद्यते। दृश्यकाव्यस्य अवतारणाय निर्देशैः सह लिख्यमानम् अवतारणसाहित्यं भवति पटकथासाहित्यमिति सामान्येन वक्तुं शक्यते। यस्य कस्यापि कार्यक्रमस्य चलच्चित्रस्य ह्रस्वचित्रस्य वा सज्जीकरणे पटकथायाः प्राधान्यं महदस्ति। अद्य आबालवृद्धं जनानपि तोषयति चलच्चित्रम्। चलच्चित्रनिर्माणाय अत्यन्तापेक्षितः घटक एव पटकथा। उत्तमां पटकथां विना निर्मीयमानं चलच्चित्रं चलच्चित्रं न भवति यदि भवति तदुपहास्यं भवेदिति विदुषां अभिप्रायः।

पटकथा सामान्येन त्रिधा भवति। विवरणात्मिका पटकथा (Descriptive Script), **चित्रीकरणपटकथा** (Shooting Script), **संशोधनपटकथा** (Censor Script) इति। कविः कथां विवरणरूपेण यत्र लिखति सा विवरणात्मिका। निदेशकः चलच्चित्रस्य चित्रीकरणसुखाय कथां विविधानाम् अङ्गानां पट्टिकारूपेण यत्र लिखति सा चित्रीकरणपटकथा। चलच्चित्रस्य निर्माणानन्तरं तत् संशोधकसमितेः प्रमाणपत्राय समर्पितं भवति। तत्र संशोधकानां निरीक्षणाय प्रत्येकं दृश्यांङ्कानां विवरणं पट्टिकारूपेण विवृणोति।

सा तु संशोधनपटकथा इति च अभिधीयते। सामान्येन समेषां चित्रीकरणपटकथा एव विदिता भवति। अतः पाठेऽस्मिन् किमर्थं पटकथां निर्माति इति बोधयितुं संस्कृतभाषायां रचितायाः 'जननी' इति संस्कृतह्रस्वचित्रस्य चित्रीकरणपटकथायाः परिचयः दीयते। (ह्रस्वचित्रं द्रष्टुं पाठपुस्तकस्थं -पुटसंख्या 87 क्यु आर् कोड् सङ्केतं उपयोक्तव्यम् )

मातृवात्सल्यं विषयत्वेन स्वीकृत्य आनुकालिकप्राधान्येन सह पालक्काट् जिल्लायां प्रवृत्ते संस्कृताध्यापकसंगमे संस्कृताध्यापकैः सज्जीकृतं भवति जननी इति संस्कृतह्रस्वचित्रम्। पटकथा, निदेशनम् - डा.निधीष् गोपिः, छायाग्रहणम्, दृश्यमिश्रणम् - डा.शरत् मित्रन्, सहायकौ - उण्णिकृष्णन् के.सि, श्रीविद्या टी.बी, अभिनेतारः - श्रीजा पी,सी, सुजासी., कृष्णन् सी.पी, विजेष्.ए.बी, सविता.के.एन्, बिजु. के.डि। संस्कृताध्यापकसंगमे एतादृशानि नैकानि संस्कृतह्रस्वचित्राणि सज्जीकृतानि सन्ति। अस्याः कथायाः संक्षिप्तं रूपमत्र दीयते।

**कथासंक्षेपः**

विवेकः धनिकः युवकः भवति। धनसुविधानाम् आधिक्ये जावमानः सः स्वार्थः अभवत्। तस्य स्तरात् अधो विद्यमानान् बान्धवान् सर्वानपि सः निर्दयं न्यवारयत्। किमधिकं, स्वमातरमपि सः अजहात्। कालान्तरे सः यकृद्रोगबाधितः अभवत्। तस्य मित्रं रजीषः समर्थः वैद्यः भवति। सः एव विवेकस्य चिकित्सां करोति। यकृतः परिवर्तनमेव रोगमुक्तये एकः उपायः। विवेकस्य रक्तगणः तु अत्यपूर्व एव। अत एव उचितयकृतः प्राप्तिः दुष्करा अभवत्। अन्तिमे कथञ्चित्

तस्य यकृत्परिवर्तनं साध्यमभवत्। तदानीं सः जागरितः। कस्य कारुण्येन स्वस्य पुनर्जन्म अभवदिति ज्ञातुं सः इच्छां प्रकटितवान्। रजीषः विवेकम् अपरं प्रकोष्ठं नयति। तत्र तस्य पुनर्जन्महेतुः माता वर्तते। तत्र किं वा प्रवर्तते इति पाठभागे द्रष्टव्यम्।

पाठः १०

# मुक्तकसौभगम्।

| | | |
|---|---|---|
| **आशयः** | : | मानविकता |
| **उपाशयः** | : | स्नेहः। |
| **व्यवहाररूपम्** | : | काव्यम् |
| **उद्देश्यानि/लक्ष्याणि** | : | चराचरस्नेहोपि मानविकतायाः अंशः भवति इति जानाति। |
| | : | मुक्तकमिति श्लोकविभागमधिकृत्य प्रत्यभिज्ञानम्। |
| **मूल्यम्/मनोभवः** | : | चराचरस्नेहः, त्यागः इत्यादीनि मूल्यानि स्वांशीकरोति |
| | : | आशयसम्पुष्टानां श्लोकानां परिचयम्। |
| **पठनलक्ष्याणि** | : | श्लोकान् सतालमालपति। |
| | : | इष्टतमस्य श्लोकस्य आस्वादनटिप्पणीं रचयति। |
| | : | मानविकताम् अधिकृत्य प्रभाषणं करोति। |
| | : | वाक्यपरिवर्त्तनं करोति। |
| | : | सतिसप्तमीप्रयोगं परिचिनोति। |
| | : | श्लोकानां गद्यक्रमं लिखति। |
| **पठनक्षमता** | : | श्लोकानाम् आलपनसामर्थ्यमार्जयति। |
| | : | महाकाव्यानां परिचयं लभते। |
| | : | मानविकमूल्यानि स्वांशीकरोति। |
| | : | समानाशययुक्तानि मुक्तकानि सञ्चिनोति। |
| | : | व्याकरणविशेषं जानाति |
| **कालांशः** | : | 12 |

**पाठस्य आमुखम्** अपरस्योपकाराय न भवति चेत् जीविनां जीवनेन किं प्रयोजनम्। पूर्वस्मिन् पाठे कारुण्यम् इति विषयमधिकृत्य वयम् अपाठाम किल। इदानिं महाकवेः कालिदासस्य काव्येभ्य उद्धृतानि परजीविस्नेहप्रतिपादकानि त्रीणि मुक्तकानि पठामः। मुक्तकम् नाम किम्। यस्मिन् श्लोके पूर्णतया सारार्थपूर्तिः भवति तादृशः श्लोकः मुक्तकमिति व्यवह्रियते। मुक्तकादीनां लक्षणम् यथा-

मुक्तकं श्लोकः एकश्च चमत्कारक्षमः सताम्।
द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैः विशेषकम्।
कलापकं चतुर्भिः स्यात् तदूर्ध्वं कुलकं स्मृतम्।।

अभिज्ञानशाकुन्तलस्य चतुर्थाङ्काद् उद्धृतम् शकुन्तलायाः प्रकृतिस्नेहप्रतिपादकम् एकं मुक्तकम्, रघुवंशमहाकाव्यस्य चतुर्दशसर्गाद् उद्धृतः हृदयावर्जकः कश्चन श्लोकः, तथा मेघदूताद् उद्धृतः अचेतननाम् स्नेहव्यक्तिप्रतिपादकः श्लोकश्च आयोजितः।

**प्रवेशकप्रवर्तनम्** प्रतिवर्षं परितःस्थितिदिने वयं सस्यानि अरोपयाम खलु। अनन्तरं तेषां परिपोषणय किं किं अकुर्म? रोपितानां सस्यानम् इदानीन्तनी अवस्था का ? तेषां नाशे दुःखमनुभूयते वा? चर्चां कृत्वा क्रोडीकरोति। कुत्रचित् सस्यानां रोपणानन्तरं यत्किमपि न करोति। परिपालनानाम् अभावेन तानि कालक्रमेण नाशं प्राप्नुवन्ति। तेषु प्रीतिरस्ति चेत् तेषां परिपालने वयं दत्तश्रद्धाः भवेम।

**पाठापग्रथनम्** महाकविः कालिदासः विश्वेस्मिन् प्रथितयशस्विषु महाकविषु प्रातःस्मरणीयो भवति। नाटकम्, महाकाव्यम्, खण्डकाव्यम् इति विभागेषु तस्य महाकवेः रचनाः अनितरसाधारणया शोभया प्रदीप्तमानाः भवन्ति। अत्र अभिज्ञानशाकुन्तलं नाटकं संस्कृतनाटकानां मध्ये

अत्यन्तरमणीयं भवति। शकुन्तलादुष्यन्तयोः प्रणयमेव हृदयावर्ज्जकेन सामर्थ्येनोपवर्णितं भवति महाकविना। तस्मादुद्धृतः श्लोकोयं प्रथमः। भर्तुः दुष्यन्तस्य प्रासादं गन्तुमुत्सुका आश्रमवासिनी शकुन्तला वियोगवेलायां स्वहस्तेन परिपोषितां लतां परिष्वज्य यात्रानुमतिं पृच्छति। अवसरेस्मिन् लताशकुन्तलयोः हृदयार्द्रतां वर्णयति 'पातुं न प्रथमम्' इति पाठभागस्थितेन प्रथमेन श्लोकेन महाकविः।

द्वितीयः श्लोकः आदिकवेः वाल्मीकिमहर्षेः कारुण्यप्रतिपादकः भवति। रामेण परित्यक्तायाः सीतायाः क्रन्दनं श्रुत्वा रुदितानुसारी कविः तामभ्यगत्य करुणामसृणैर्वचनैः सान्त्वयन् स्वाश्रमं नयति। निस्सङ्गस्यापि मुनेः मनसि कारुण्यस्य लोलायमानत्वं भवतीति श्लेकेस्मिन् प्रदर्शयति महाकविः।

मेघसन्देशकाव्यं कल्पनाचतुरस्य कालिदासमहाकवेः भावनायाः मकुटायमानं भवति। अचेतनानामपि अव्यक्ते मनसि स्नेहव्यक्तिर्भवति चेतनानामिवेति अत्र वर्णयति। उत्तुङ्गस्य गिरेः वर्षाकालमेघस्य च मिथो मैत्रीं प्रदर्शयितुं समर्थोऽस्ति पाठभागस्थस्तृतीयश्लोकः।

**पठनप्रवर्तनम्**

**प्रवर्तनम् -1** **श्लोकान् सतालमालपतु।**

**पठनलक्ष्यम्** श्लोकानाम् आलपनसामर्थ्यं लभते।

छात्रान् सङ्घान् कृत्वा पाठभागस्थं श्लोकत्रयं विभज्य एकैकस्य सङ्घस्य एकैकं मुक्तकम् आलपनाय ददाति। एकस्य संङ्घस्य आलपनं श्रुत्वा अन्ये मूल्यनिर्णयं करोतु। यः सङ्घः अक्षरस्फुटतया उचितेन भावेन आलपति सःसङ्घः अभिनन्दनीयः।

**मूल्यनिर्णयसूचकानि**

आलपनसामर्थ्यम्, वृत्तबोधः, आशयस्पष्टता।

**प्रवर्तनम् -2** **पद्यं पठित्वा गद्यक्रमम् आशयं च लिखतु ।**

**पठनलक्ष्यम्** आकांक्षारूपेण श्लोकानाम् अन्वयलेखनाय सामर्थ्यं लभते।

श्लोकानां गद्यक्रमलेखनाय आकांक्षारूपेण प्रश्नान् पृच्छति। उत्तरेण उपलब्धानि पदानि विशेषण विशेष्यानुसारं क्रमीकृत्य अव्ययपदानि च यथोचितं संयोज्य अन्वयं (गद्यक्रमं)लिखति।

**मूल्यनिर्णयसूचकानि**

आशयस्पष्टता, वाक्यघटना, सर्वेषांपदानां प्रयोगः।

यथा-

| | | |
|---|---|---|
| क्रियापदं किम् | - | अभ्यगच्छत्। |
| कः आभ्यगच्छत् | - | कविः |
| कीदृशः कविः | - | रुदितानुसारी |
| पुनः कीदृशः | - | यातः |
| किमर्थं यातः | - | कुशेध्माहरणाय |
| कां अभ्यगच्छत् | - | ताम् (सीताम्) |
| अपरं क्रियापदं किम् | - | आपद्यत। |
| किं आपद्यत | - | श्लोकत्वम् |
| कः श्लोकत्वमापद्यत | - | शोकः |
| कीदृशः शोकः | - | निषादविद्धाण्डजदर्शनोत्थः |
| कस्य | - | यस्य कवेः। |

**गद्यक्रमः** *(एकैकेषां प्रश्नानाम् उत्तरं व्युत्क्रमेण क्रमीकृत्य गद्यक्रमः लिखति।)*

**यथा-** यस्य कवेः निषादविद्धाण्डजदर्शनोत्थः शोकः श्लोकत्वम्

आपद्यत कुशेध्माहरणाय यातः रुदितानुसारी (सः) कविः ताम् अभ्यगच्छत्।

**प्रवर्तनम् -3** **श्लोकानाम् आशयं स्ववाक्यैः लिखति।**

**पठनलक्ष्यम्** आशयग्रहणसामर्थ्यम् प्रवर्धते।

श्लोकानाम् आशयं प्रादेशिकभाषया संस्कृतभाषया च टिप्पणीपुस्तके लिखतु।

**मूल्यनिर्णयसूचके**

आशयपूर्णता , भाषाशैली ।

**प्रवर्तनम् -4** **इष्टतमं श्लोकम् अधिकृत्य आस्वादनटिप्पणीं लिखति।**

**पठनलक्ष्यम्** टिप्पणीलेखनसामर्थ्यं प्रवर्धते।

आस्वादनटिप्पणीलेखनावसरे इष्टतमश्लोकम् अधिकृत्य लघुविवरणं प्रथमं करणीयम्। तदनु श्लोकस्य अशयः, तस्य चमत्कारिता, तं श्लोकम् इष्टतमं भवितुं कारणं च क्रमेण प्रतिपादनीयम् ।

**मूल्यनिर्णयसूचकानि**

औचित्यम् , आशयपूर्णता , भाषाशैली, ।

**मातृका-** श्लोकः - पातुं न.......... सर्वैरनुज्ञायताम्।।

महाकविना कालिदासेन विरचितं नाटकं भवति अभिज्ञानशाकुन्तलम्। नाटकस्यास्य चतुर्थोऽङ्के शकुन्तलायाः पतिगृहगमनं वर्णयति। यदा शकुन्तला स्वहस्तेन परिपालितानि सस्यानि समालिङ्ग्य यात्रानुमतिं पृच्छति तदा तातः कण्वः वदति। सस्यानि जलेषु अपीतेषु सत्सु या जलं न पिबति, अलङ्कारप्रियापि स्वालङ्काराय या सस्यानां नवपल्लवं कदापि न लुनाति, सस्यानां नवपुष्पागमने या अत्यन्ताह्लादमनुभवति सा शकुन्तला यात्रानुमतिं पृच्छतीति कण्वः

वदति। अत्र शकुन्तलायाः सस्यानि प्रति स्नेहप्रवृत्तिर्भवतीति कालिदासः वर्णयति। चराचरस्नेहस्य अपूर्ववर्णनमस्मिन् श्लोके दरीदृश्यते।

**प्रवर्तनम् -5** **कालिदासस्य मानविकतामधिकृत्य प्रभाषणं विलिख्य अवतारयतु।**

**पठनलक्ष्यम्** विषयानुसरं प्रभाषणं कर्तुं सामर्थ्यं प्रवर्धते।

कालिदासस्य मानविकताम् अधिकृत्य प्रभाषणलेखनाय अध्यापकः छात्रान् निर्दिशति। प्रभाषणलेखनाय अन्तर्जालस्य वा ग्रन्थानां साहाय्यम् स्वीकर्तुं निर्देशः ददातु।

**मूल्यनिर्णयसूचकानि**

भाषाशुद्धिः, आशयक्रमीकरणम्, अवतारणशैली।

**मातृका-**

नमः सर्वेभ्यः चराचरेभ्यः। अधुनाहं महाकवेः कालिदाससस्य कृतिषु मानविकता इति विषयमधिकृत्य किञ्चिद् वच्मि। संस्कृतसाहित्ये अनेके महाकवयः सन्ति। तेष्वपि कनिष्ठिकाधिष्ठितं स्थानमारोहति महाकविः कालिदासः। कालिदासस्य महाकाव्येषु नाटकेषु च सर्वत्र प्रकृतिचित्रणस्य मनोहरिता चमत्कारशोभया द्रष्टुं शक्यते। मृगपक्षिणां वृक्षलतादीनां नदीपर्वतादीनां च हृदयं सूक्ष्मेक्षिकया समीक्ष्य तद् भावगम्भीरया वाचा महाकविः वर्णयति। अनुवाचकानामपि मनसि कारुण्यादिकं विकारमुत्पादयितुं वर्णनेयं समर्थास्ति। भावस्थिराणि जननान्तरसौहृदानि, रुदितानुसारी कविः इत्यादिषु कविप्रयोगेषु मानविकतायाः अपूर्वसौन्दर्शं दरीदृश्यते। ऋतुभेदानुसारं चराचराणां जीवने दृश्यमानान् मृदुलोलभावान् परिपूर्णतया वर्णयितुं समर्थस्यास्य महाकवेः कृतीनां पठनेन अस्माकमपि मनसि तादृशी भावना भविष्यतीति विज्ञाप्याहं विरमामि।

**प्रवर्तनम् -6** **उदाहरणानुसारं वाक्यश्रृङ्खलां निर्मांति**

**पठनलक्ष्यम्** विशेषणविशेष्यादीनां यथाक्रमयोजनेन वाक्यपूर्तिं कर्तुं ज्ञानं लभते।

उदाहरणानुसारं वाक्यश्रृङ्खलानिर्माणाय छात्रान् निर्दिशति। उचितासाहाय्यमपि ददाति।

**मूल्यनिर्णयसूचके**

आशयपूर्णता, वाख्यघटना ।

**प्रवर्तनम् -7** **उदाहरणानुसारं सति सप्तमी उपयुज्य वाक्यानि परिवर्तयति।**

**पठनलक्ष्यम्** विभक्तीनां प्रयोगविशेषं जानाति।

सतिसप्तमी प्रयोगः कः इति अध्यापकः सोदाहरणं छात्रान् बोधयति। अनन्तरं पाठपुस्तके दत्तानां प्रश्नानाम् उत्तरलेखनाय निर्दिशति। उचितं साहाय्यं ददाति।

**मूल्यनिर्णयसूचकानि**

आशयपूर्णता, वाख्यघटना , सप्तमीविभक्तेः प्रयोगः।

क) मेघेषु व्याप्तेषु **सत्सु** वृष्टिः अजायत।

ख) बालकेषु आगतेषु **सत्सु** सन्तोषः सञ्जातः।

ग) उत्सवेषु समागतेषु **सत्सु** वणिजाः उत्साहभरिताः अभवन्।

सतिसप्तमीपरिचायनम्

सङ्कीर्णवाक्येषु अङ्गिवाक्यम्, अङ्गवाक्यम् इति वाक्यद्वयं भवति। तयोरङ्गिवाक्यमेव प्रधानम्। अङ्गिवाक्यस्य क्रियाभावकालम् अङ्गवाक्यक्रियाभावेन निर्दिशति चेत् तदा अङ्गवाक्यस्य कर्ता च क्रिया च सप्तमीविभक्त्या निर्दिश्यते। एषा रीतिः सतिसप्तमी अथवा भावलक्षणसप्तमी इति व्यवह्रियते। यस्य च भावेन भावलक्षणम् (अष्टाध्यायी 2-3-37)। अङ्गवाक्यस्य क्रिया प्रायेण निष्ठाप्रत्ययान्ता भवति।

**मातृका**

**बालः सुप्तः। माता भक्षणं पचति।** എന്നീ വാക്യങ്ങളിൽ **बालः सुप्तः** എന്നത് അംഗവാക്യവും **माता भक्षणं पचति** എന്നത് അംഗിവാക്യവുമാകുന്നു. അംഗിവാക്യത്തിലെ പാചകം ചെയ്യുന്നു എന്ന ക്രിയയുടെ സമയത്തെസൂചിപ്പിക്കാൻ അംഗവാക്യത്തിലെ **बालः सुप्तः** എന്നീ പദങ്ങളെ സപ്തമീ വിഭക്തിയിലേക്ക് പരിവർത്തനം ചെയ്യുന്നു. **बाले सुप्ते सति माता भक्षणं पचति** എന്നമാറ്റത്തിന് വിധേയമാകുന്നു.

**प्रवर्तनम् -7** **प्रादेशिककविताभ्यः मानविकताप्रकाशिकाः पङ्क्तीः चित्वा अवतारयतु।**

**पठनलक्ष्यम्** समानाशययुक्तानां अन्यभाषापङ्क्तीनां परिचायनम्।

प्रादेशिकभाषासु विद्यमानाः मानविकता प्रतिपादिकाः पङ्क्तयः चित्वा सम्पुटं रचयति।

**मूल्यनिर्णयसूचकानि**

आशयपूर्णता, चयनसामर्थ्यम्, क्रमीकरणचारुता।

**उदाहरणम्-**

'ഒരു കണ്ണീർക്കണം മറ്റുള്ളവർക്കായ് ഞാൻ പൊഴിക്കവേ
ഉദിക്കയാണെന്നാത്മാവിലായിരം സൗരമണ്ഡലം
ഒരു പുഞ്ചിരി ഞാൻ മറ്റുള്ളവർക്കായ് ചെലവാക്കവേ
ഹൃദയത്തിലുലാവുന്നു നിത്യനിർമലപൗർണമി' ......
(അക്കിത്തം അച്യുതൻനമ്പൂതിരി)

സ്നേഹിക്കയുണ്ണീ നീ നിന്നെ
ദ്രോഹിക്കുന്ന ജനത്തെയും
ദ്രോഹം ദ്വേഷത്തെ നീക്കിടാ
സ്നേഹം നീക്കിടുമോർക്ക നീ! (എൻ. കുമാരനാശാൻ)

സ്നേഹിക്കയില്ല ഞാൻ
നോവുമാത്മാവിനെ
സ്നേഹിച്ചിടാത്തൊരു

തത്വശാസ്ത്രത്തെയും.
മാനിക്കയില്ല ഞാൻ
മാനവമൂല്യങ്ങൾ
മാനിച്ചിടാത്തൊരു
നീതിശാസ്ത്രത്തെയും .... (വയലാർ രാമവർമ്മ)

कालिदासमहाकवेः कृतिषु विद्यमानाः काश्चन सूक्तयःअधः दीयन्ते।

एतेषां सामान्याशविवरणम् अध्यापकः करोति।

सूक्तयः

- पुराणमित्येव न साधुसर्वम् । - मालविकाग्निमित्रम्
- भावस्थिराणि जननान्तरसौहृदानि । - अभिज्ञानशाकुन्तलम्
- न धर्मवृद्धेषु वयःसमीक्ष्यते । - रघुवंशम्
- भिन्नरुचिर्हिलोकः । - रघुवंशम्
- न रत्नमन्विष्यति मृग्यते हि तत् । - कुमारसम्भवम्।
- विषमप्यमृतं भवेत् क्वचित्
  अमृतं वा विषमीश्वरेच्छया । - रघुवंशम्
- शरीरमाद्यं खलु धर्मसाधनम्। - कुमारसम्भवम्।
- आपन्नार्त्तिप्रशमनफलाःसम्पदो ह्युत्तमानाम् -मेघसन्देशः।
- सतां हि सन्देहपदेषु वस्तुषु
  प्रमाणमन्तःकरणप्रवृत्तयः ।। - अभिज्ञानशाकुन्तलम्।

State Council of Educational
Research and Training (SCERT)
Vidyabhavan, Poojappura, Thiruvananthapuram
Kerala-695 012. Website www.scert.kerala.gov.in
e-mail scertkerala@gmail.com

